र्थस्यानंत्येपीश्वरबुद्धिः सा एकैवेत्याशंक्याह प्रत्यर्थं नियतत्वाच्चेति यावंतमर्थकंमवलंब्योत्पन्नाया बुद्धिः सा तावत्येवा
र्थे नियता नार्थांतरं स्पृशति न वास्पृष्टं परिहरति स्वभाववैपरिहारप्रसंगात्तत्तथा स्वार्थस्यानंत्याद्बुद्धिरप्यनंता भवती चा
ति ईश्वरबुद्धिरपि नियतार्थैव न हि सा परिगाह्यमर्थं परिहत्य न वगाहं वा वगाहं त इति भावः व्यासमुक्ता समासमाह तस्या
इति समासतः संक्षेपतः सेति पूरणीयं विद्या चाविद्या चेति यथार्थज्ञानं विद्या अयथार्थज्ञानमविद्या परस्परमुद्ध
यार्थाभावकारणमात् तृतीयः प्रकारो व्यवच्छिद्यते न त्वसौ संभवति शंकाया अपि व्याहतत्वादिति अत्र विद्यापूर्वकत्वाद
विद्यायाः पश्चादुक्तायाः अपि लघुप्रतिपत्तिकत्वात् प्रथमं विभागमाह तत्रापि चेति यद्यपि मूलबुद्धावयथार्थायां स्मृतिरेव राम.
५४

यथार्थैव यथा रज्जुभुजंगतयोपलभ्य पलायितस्य तथैव स्मृतिः सर्पसर्प इति तथा पित्तदूषितचक्षुषां यथायं संशयादिरूपतयैव तद्व्यवहारः य यथा
थार्थानुस्मृतिः प्रत्यक्षादिषु विषयप्रबंधेषु नांतर्भविष्यतीति पृथक्कृत्य व्यवहरिष्यत इति। अथ तर्कः किं न गणितः अनुभूयते हि संशयनिर्णयांत
तरा संशयात् प्रच्युतो निर्णयं चाप्राप्तः प्रमाणानामनुग्राहक ऊहापरनामा प्रसंगात्मा प्रमाकरणनिष्ठो बुधेयो व्यापारः कुठारगोचर इ
वोद्यमननिपतनादिः। अस्य त्विज्ञाततत्त्वो विषयः कारणोपपत्तिः पराभ्युपगम हेतुलक्षणा जननी प्रमाणमनुग्राह्यं। अनियतजिज्ञा
साविच्छेदेन नियतजिज्ञासाजननमनुग्रहः सैव संभावने सुच्यते प्रमाणानां गम्यसतत्त्वस्य लेनैव फलवत्त्वात् इह भूतले यद्यभविष्यत् घट इदमिव
सास्यत इत्साकारः शरीरं। न च संशय एवायमेककोटिकत्वात्। न निर्णयो यथार्थत्वात्। न यथार्थ आरोपितहेतुसंबंधत्वात्। यदि स्यादध्ये
नेनियद्यलंकृतोऽर्थः सत्य एवेति चेन्न अनियतकोटिपनिपातेनियतकोटिपरिग्रहस्य यथार्थत्वात्। न चैतावतैव सत्सत्वं आपादकसत्वव्यदापाद्य
सत्त्वस्यापि वाधितत्वात्। कथं तर्हि प्रमाणानामप्यनुगृह्णीयात् अनियतेच्छाविच्छेदेनेत्युक्तं। न हि कुर्यां न कुर्यामिति अनियतचिकीर्षुः कर्त्ता

गु०कि० किंचित्करोति। ऽनिपत्तेरविच्छेद एव कथमस्मादिति चेत् अनिष्टापत्तिनियतत्वादस्य। यथा सविषान्नभक्षणेप्सतस्य सविषमिदं भक्ष
५५।५६ यिष्यामि मरिष्यामीत्यनिष्टापत्तेर्न भक्षयेयमिति तद्भक्षणमेव भक्षणेच्छाविच्छित्तिः। अमानुषहृदयमनिष्टप्रमितहानिरप्रामाणिकोपगमश्चेति।
नन्विदं तुरगारूढस्य तुरगविस्मरणं पन्नाकिकाभिमानमुद्वहन्नपि न तर्कं गणयति अनेनैव परीक्षको लौकिकमतिशेत इति सत्यमेवैतत् विवि
55/56 पर्ययं प्रथमे दत्वानुपृथगनुपदिष्टः। तथापि न्यायाङ्गतया विशेषतोऽनुसारदनमर्हतीति चेत् न तस्य छलादिवत्समानतन्त्रविषयत्वादिति। तत्रो
देशक्रमानुसारेण संशयं निरूपयति संशयस्तावदिति। तावच्छब्दः क्रमे। संशयः प्रथमं कथ्यते ततो विपर्ययादिः कथयिष्यत इत्यर्थः। कि
स्विदिति साकारं दर्शयति किंस्विदिदमेवमथैवमित्याकारः प्रत्ययः संशय इत्यर्थः। विमर्षो विरोधिनानार्थावमर्ष इति विषयतः संशयस्वरूप
मुक्तं। एतदेवस्पष्टीकर्तुमुभयावलम्बीति। विरोध्युभयप्रकारः प्रत्ययः संशय इत्यर्थः। विमर्षो विरोधिनानार्थावमर्ष इति विषयतः संशयस्व राम०
रूपमुक्तं। एतदेवस्पष्टीकर्तुमुभयावलम्बीति। विरोध्युभयप्रकारकधर्मावलम्बीत्यर्थः। प्रसिद्धेत्यादिकारणकथनं। प्रसिद्धाः प्रतीताः अनेके विशे ५६

षः परस्परव्यावर्त्तकः स्थिरः पाणिपादयो वक्रकोटरादय स्तयोः स्थाणुपुरुषयो स्तयोः क्वचिदेकत्रैव धर्मिणि सादृश्यमात्रदर्शनात् समानधर्मदर्शना
त्तात्तदग्रहणान्निर्णायकविशेषादर्शनादिति लभ्यते। उभयोर्यो विशेषो स्थाणुत्वपुरुषत्वे इति यावत् तयोरननुस्मृतौ सत्यां संशयो जायते। एतदुक्तं भव
ति उभयविशेषानुस्मरणानिर्णायकादर्शनसहितात् समानधर्मवद्धर्मिदर्शनादिति। संशयस्य च नित्यदुःखहेतुत्वात् अन्यथा तद्धानार्थं विशेषजि
ज्ञासानुपपत्तेः दुःखतत्साधनयोश्च धर्मेहेतुकत्वनियमात् उत्पत्तिमत्तयाऽदृष्टहेतुत्वे सिद्धे तद्विशेषमाह अधर्माच्चेति। आत्ममनःसंयोगादयः
साधारणत्वान्नोक्ताः। लघुकारणत्वादिति अवान्तरभेदमाह स चेति। ज्ञानधर्मनिमित्तकोऽन्तःसंशयो ज्ञेयधर्मनिमित्तको बहिःसंशय इति विभागः।
प्रथमां विधामाह अन्तस्तावदिति। आदेशिको ज्योतिषिकः अविपर्ययेन तया सम्यग्भ्रान्ततया मिथ्यात्वादि प्रग्रहोपरागपुनरादिश्यतः कथयतस्त्रि
षु कालेषु सत्यसती चर्या पंचमेहनि युद्धमभूत् तस्माच्चाम घपर्जन्यो वर्षति पौर्णमास्यां चंद्रोपरागो भविष्यतीति स्वगणितज्ञाने संशयो भवति भ्रान्तोऽहमस्मि
न्न वेति सम्यग्दर्शी वेति। द्वितीयां विधामाह बहिरपीति। साधारणलिंगदर्शनादुभयसाधारणत्वतुल्यदमात्रलिंगदर्शनात्। उभयविशेषेतिगोगवय

गु०कि० विशेषानुस्मरणादिति। प्रत्यक्षविषयेपीति। एतदुक्तं भवति यथा समानधर्मजत्वाविशेषेपि प्रत्यक्षाप्रत्यक्षविषयतयांतर्गणिको भेदस्तथा समा
५७ नधर्मजत्वाविशेषात् ज्ञातत्वे यस्त्वधर्मजत्वमांतर्गणिको भेदः न तु समानधर्मजत्वविरोधे न यथाहि ज्ञानत्वाद्यथार्थमयथार्थं चेति ज्ञायमान
57 त्वात्तथाभूतमयथाभूतं वेति समानादेव धर्मात् एवमयोग्यत्वे तद्वत्तयानुपलभ्यमानत्वादिसपि समानादेव धर्मात् तथा व्याहतप्रतिपत्तित्वा
त् व्याहतप्रतिपत्तिविषयत्वाच्चेति समानादेव धर्मात् एषां सर्वेषां तदन्तसाधारणत्वादिति असाधारणस्तु धर्मो ग्रे निरूपयिष्यत इति एकविध एव सं
शय इति। ननु स्थाणुर्वा पुरुषो वेति वा शब्दः सादृश्यार्थः तथा च स्थाणुरिव पुरुष इवेति स्यात् स्थाणुपुरुषसदृशोयमिति च ज्ञानं यथार्थमेव क
थमविद्याप्रभेद इति। मैवं सारूप्यज्ञानाद्धि कल्पज्ञानस्याधिकस्यानुभवसिद्धत्वात् असंशयेपि सारूप्योपलब्धेः तद्यथा स्थाणुपुरुषसदृशी
यं छायेति। तथापि सदृशदर्शनजमुभयस्मरणमात्रं विद्यैवेति चेत् न उभयस्मृतेरस्यातिरेकात् नौ स्थाणुपुरुषावयं तत्सदृशः पाषाणस्तंभ राम०
इति हि निश्चयात्मकः प्रत्ययः संशयस्तु निश्चयात्मेति। भेदाग्रहेतु वक्ष्यामः नचाधिकोप्ययं यथार्थः नो खलु विकल्प्यमानं वस्त्वर्थक्रियासु वो ५७

प्रयुज्यते। कथं तर्ह्यारोप्येणापीति चेत् न परस्परविरुद्धयोरेवैकस्मिन् धर्मिणि समारोप्यमानयोर्विकल्पविषयत्वात् तयोः प्रत्येकं प्रतीतत्वादि
सेतत्सर्वमभिसंधायोक्तं उभयत आकृष्यमाणस्यात्मनः प्रत्ययो दोलायत इति तदेवमनर्थजत्वाविशेषेऽप्यनिश्चयात्मकात्संशयान्निश्चयात्म
को विपर्ययोऽभिद्यत इति सिद्धिः तीयमविद्याप्रभेदमाह विपर्ययोऽपीति। अपं तर्वहिश्चेत्सपेरर्थेः। प्रसिद्धेत्यादि अतस्मिंस्तदिति प्रत्ययो विपर्ययः अतस्मि
न्नित्यस्य याथार्थ्यतादर्शितात्तेन विद्यातो। समानजातीयाद्व्यवच्छेदः तदितिनिश्चयाकारतातेनानिश्चयात्मकसमानजातीयसंशयाद्व्यवच्छेदः। प्र
त्यय इति ज्ञानावच्छिन्नत्वं तेन स्वप्नव्यवच्छेद इति। एतदुक्तं भवति अयथार्थनिश्चयात्मकं ज्ञानावच्छिन्नज्ञानं विपर्यय इति लोके तथैव प्रसिद्धेः। कारणमाह
प्रसिद्धेति। प्रसिद्धाः प्रतीता अनेके विशेषाः परस्परव्यावृत्तिहेतवो धर्मा ययोरारोप्यारोपविषययोः शुक्तिरजतयोस्तौ तयोः। तद्ध्यारोप्यारोपविषयापरिज्ञाने
कश्चिद्विपर्ययेति आरोप्यापरिज्ञाने सामर्थ्यानुपलब्धौ तद्गततासंभवे नहानोपादानादिव्यवहारानुपपत्तेः अनुपलब्धे संस्कारस्यासंभवे सादृश्यानु
नुपयोगात् अन्वयव्यतिरेकाभ्यां सादृश्यदर्शनस्य च विभ्रमं प्रतिकारणत्वावधारणात् आरोपविषयाप्रतीतौ निरालंबनत्वापातात्। अन्यथाख्याति

गु०कि० पक्षे च समानत्वं न तु नियमादिति। ननु तिक्तो गुडः पीतः शंख इत्यत्र सारूप्याभावेऽपि भ्रमदर्शनात् कथमेतत्। न आरोप्यज्ञानजनितसंस्का
५८ रसहकारितया तदुपस्थापनेन सारूप्यमुपयुज्यते न त्वन्यथा। न च पीतिमतिक्तत्वयोरप्यादेरिव संस्कारोपस्थापकत्वं प्रत्यक्षत एवोपस्थितेः
58 न च तिक्तत्वपीतिमानावन्नायेप्योऽपि तु तयोः संसृष्टतातथा च सैव यावत्तोपस्थापने तावदेव सारूप्यमिह ग्राह्यं अगृह्यमाणसंसर्गत्वं च
तथा तत्त्व संसर्गगुडेनास्यास्तीति न किंचिदनुपपन्नं। स्यादेतत् किं न योऽस्मितउक्तम् अयथार्थालोचनान्न यथार्थालोचनाभावात् तत्त्वा
यहारिति यावत्। संप्रति विभ्रमकाले। अतो विशेषनिषेधात् साधारणधर्मवद्धर्मिणो ग्रहे सतीति लभ्यते यस्यासौ विभ्रमो भविष्यतीति तस्य पित्तकफानि
लोपहतेन्द्रियस्येति समवायिकारणं दर्शयता सन्निहितविशेषाग्रहे चासन्निहितविशेषारोपे चेन्द्रियोपघातस्य हेतुत्वमुक्तं भवति। अन्वयव्यति
रेकसिद्धं चैतत्। न च दोषाः सहजशक्तिविघातहेतव एव विरुद्धसहकारिसन्निवेशादेवास्यापि विरुद्धकार्यजननाविरोधात् धर्माधर्माभ्यामा रा म०
त्मनः सुखदुःखवत्। परेषां वातस्यैव ज्ञानस्य भेदाग्रहेण विपरीतव्यवहारवत्। असन्निहिते सादिनाऽपेक्षणीयं निमित्तमुक्तं। आत्ममन ५८

सोऽसंयोगादि सत्समवायिकारणमुक्तं। यद्यपि विद्यमानं क्वचित्सुखमपि भवति तथापि दुःखोदर्कं तदपि सर्वथाप्यधर्मो हेतुरस्तीत्यभिप्रायवतो क्रमध
र्मोच्चेति। उदाहरणं यथागखेवाम्बर इति। ननु संभवत्वेतत् दृश्ये दर्पणान्तरस्य सुखदृश्यस्यारोपः कथं पुनरतीन्द्रियस्य परात्मनो निमेषोन्मेषाद्यनुमि
तस्य प्रत्यक्षेऽसंततिविसदृशोऽस्समारोपो। यथासौ सुखी पंडितः शूरः कामी सादित्तद्वंसस्यएवायं प्रत्ययोस्तीति चार्वाकास्तान्प्रत्याह ऽत्रासत्यपीति।
शब्दलिंगानुमितं व्यापकममूर्त्तमाकाशमिति हि वस्तुगतिः तद्व्यपगतघनपटलेवितता लोकमंडलेस्वच्छानवच्छिन्नदेशतयाऽबृहन्नाविष्टं भना
मेयेतया च सारूप्येणारोप्यते इति लोकानुभवसिद्धं तद्वदात्मनोऽपि दर्पणमूर्त्तो नराभयोज्यतपातत्स्य यो जडकतया च सारूप्येण शरीरतादात्म्यारोप
इति भावः। यत्तु वियति विक्षिप्तनयनाः नीलिमानमाकलयंति तदति दूरंगमाः नयनरश्मयस्तिग्मकरकराघातपराहतनाः स्वाधिष्ठानगोलकाभि
संवद्धास्तदी[illegible]यामेव श्यामिकां गगनेऽपि तत्प्रतिमानमिव शंखादावारोपयंतीति केचित्। अत्र चकाचक्लाक्षाः साक्षीकर्तमुचिताः यथा तु भगवान्पतं
जलिराह तथा याद्यं भूगोलकमध्यमेधीभूतसमुमेरोः प्रत्यगुदक्प्रागवाक्क्रमेण राजतसुवर्णपद्मरागेन्द्रनीलमयानि चत्वारि शृंगाणि तस्य दक्षि

गु० कि०
५९
५९

णेनेंद्रनीलमयस्य शृंगस्य प्रभयाऽऽकाशं नीलमाभाति ऽन्यत्र सितपीतलोहितमिति। तथापि निःक्रिये नीरूपे ऽसंतविसदृशे कथं क्रियारू
पाध्यारोपः सादृश्यनिबंधनत्वात् भ्रांतेरित्यत उदाहरणांतरमाह ऽंजनेति। शार्वे पीइदं दृश्यते वैरभाभावस्य तमसश्च कृष्णमोत्रग्राह्यतया शुक्लभास्वर
रूपविरोधितया च सारूप्येण नियमादृष्टवशाच्च संस्कारोपस्थापितश्यामावत्तासो यथा तथा निःक्रियस्यात्मनो देशांतरोपलब्धिलक्षणक्रियावत्ता
रूप्यात्त्रीरूपस्यापि संयुक्तसमवायेन रूपसन्निकर्षलक्षणारूपवत्तारूप्यात्तथावभास इति एवमन्यत्रसरे रौपरमाणुरिति चलत्सु पताकादिषु वायुरयं
गातीति जले चलति तत्प्रतिबिंबितं सतारकं नभश्चलतीत्युदाहरणमूहनीयं। ऽनुमानविषयेपीति ऽलिंगे लिंगाभिमानादनध्यासूलेनपाभू
तानुमित्याभास इत्यनेकोदाहरणानुगतः संक्षेपः। एवं लौकिकं विपर्ययमुक्त्वा परीक्षकविपर्ययमुदाहरति त्रयीति। ऋग्यजुःसाम्नां त्रयं त्रयी
सैव दर्शनं दृश्यते ऽनेन पारलौकिकः पंथाः तद्विपरीतेषु तद्विरुद्धेषु शाक्याः बौद्धाः ऽआदिशब्दाद्दिगंबरादयः तेषां दर्शनेषु दर्शनप्रतिरूपकेषु इदं श्रेयः राम०
प्रशस्ततरमिति विपर्यस्तस्तरप्राशः ॰ स्वस्य सिद्धप्रामाण्यत्रयीसिद्धत्वात् शरीरेंद्रियमनस्सु ऽआत्माभिमानः तेषामनात्मत्वस्य प्रमाणसिद्धत्वात्। ५९

कृतकेषु पृथिव्यादिषु नित्यत्वदर्शनेन दृष्टिः कारणावैकल्ये कार्योत्पत्तिज्ञानमकर्तृकं विश्वं मोक्षे सुखं तत्त्वज्ञानं चेति हितमुपदिशन्तु वेदबहेषु। अ
हितमिति अहितमुपदिशन्तु तेष्वेव हितमिति। अथ वा वस्तुगत्या यदहितं तद्धितमित्युपदिशन्तु पातंडेषु हितमिति ज्ञानमित्यर्थः॥ इह विभ्र
मे प्रवृत्तिनिवृत्तियोग्योऽर्थः परिस्फुरतीत्यनुभवसिद्धं न चासतोऽसत्त्वया स्फुरणे प्रवृत्तिरस्ति न ह्यसदिहेदं रजतमिति सवगम्य रजतार्थी प्रवर्त्तते इति
संभवति एवं ज्ञानाकारमवेदनेपि प्रवृत्त्यनुपपत्तिः न हि ज्ञानात्मनो रजतस्य बहिर्व्यवहारे सामर्थ्यमस्ति न चासमर्थस्यानवगतसामर्थ्यस्य वा
प्रवृत्तिविषयत्वं ततोऽसतः सत्वेनासमर्थत्वेनावभासनमन्यथाख्यातिस्तद्भेदाग्रहो वेति द्वयमवशिष्यते। विचारासहत्वलक्षणानिर्वचनीयख्याताव
पि तथा नहि विचारासहमेतद्रजतमित्यवधार्येकश्चित्प्रवर्त्तते तस्मात्तत्रापि विचारासहत्वेन ज्ञानं तद्भेदाग्रहो वेति द्वयमवशिष्यते। तत्र प्रथमे वि
परीतख्यातिपक्षपात एव वादिनामित्यर्द्धं तावदवसितं भारस्य। द्वितीये तु विचिंत्यते अन्यज्ञानादन्यत्र प्रवृत्तावतिप्रसंगे कः प्रतीकार इति। प्रवर्त्तक
ज्ञानसारूप्यं भेदाग्रह इति चेत् न निवर्त्तकसारूप्यस्यापि भेदाग्रहस्य संभवात् न च सारूप्यादन्यकार्यमन्यः करोति स्फुलिंगसारूप्यात् ख

गु०क्रि० द्योतेनापि ग्राह्यसंगतः। स्यादेतत् न वयमभेदग्रहं व्यवहाराङ्गमङ्गीकुर्मः सारूप्यादिभ्रमो व्यवहारयतीत्याचक्ष्महे किंनाम सर्वत्र भेदाग्रहएव व्यव
६० हारकारणं तत्र पुरोवर्त्तिज्ञानस्य यदापेक्षितार्थज्ञानं सन्निहितं तदा तद्भेदाग्रहात् व्यवहर्त्तते यदा तु हेयज्ञानं सन्निहितं तदा तद्भेदाग्रहान्निवर्त्तते
60 यदा तूभयज्ञानं सन्निहितं तदा तद्भेदाग्रहाद्दोलायत इति कोतिप्रसंगः सत्यज्ञानेपि भेदाग्रहादेव व्यवहरतीति नानियतहेतुकत्वं न युगपत्प्रवृत्ति
निवृत्ती। न चास्मन्नयेऽपेक्षिताभेदग्रहस्य चानपेक्षितभेदग्रहसाहचर्यनियमवत् तथापि नये चापेक्षितानपेक्षितभेदाग्रहस्य युगपद्भावाहित्वा
त् अन्यथा विपरीतख्यात्यापत्तेः। इदं रजतमिति ह्यवधारणात्मकं नेदं रजतमिति निष्ठानियतं तथा च रजताद्भेदस्याग्रहे विपरीतख्याति
रापद्यते अरजतात्मनस्तत्रजतात्मनावभासमानत्वात् भेदाग्रहमात्रेण निवृत्तेरप्यापत्तेः अनपेक्षितभेदाग्रहस्य निवृत्तिकारणत्वेनाभ्यु
पगमात्। नेदं रजतमित्यनपेक्षिताभेदाग्रहो नत्वर्थो न तु ततो भेदग्रह इति चेत् मा भूत् भेदाग्रहस्तावत् कण्ठगतैरपि प्राणैरपरिहेयः तथाप्यनपे एम०
क्षिताभेदाग्रहान्न निवर्त्तत इति चेत्। यद्येवमपेक्षिताभेदाग्रहान्न प्रवर्त्तेतापीति नायं पन्थाः न च भेदाग्रहस्य सर्वत्र प्रवृत्तिकारणत्वमभ्युपगच्छ ६०

तोऽभेदग्रहे क्वचित्प्रमाणमस्ति अबाधितसामानाधिकरण्यप्रतिपत्तिरेव प्रमाणमित्यपि वाच्यं यद्यभेदाग्रहादेव सामानाधिकरण्यव्यवहारस्तदा
कुतोयं विभाग इति चिंत्यं। अभेदग्रहस्य व्यवहारानंगतया व्यवहारेणाव्यवस्थापयितुमशक्यत्वात् भेदस्य योग्यानुपलंभबाधितत्वादिति चे
त्। अथ कोयं भेदस्य बाधो यद्यनुपलंभमात्रं नाभेदसिद्धिः अथाभेदप्रतिपत्तिः ननु किमस्यां प्रमाणमिति सैव चिंत्यते। व्यवहारस्यान्यथै
वसिद्धेरिति कृतं विस्तरेण॥ ॥संप्रत्यनध्यवसायलक्षणं तृतीयां विधामाह अनध्यवसायोपीति। अनुपलब्धसपक्षविपक्षसंसर्गस्य धर्म
स्य दर्शनात् विशेषत उपलब्धानुपलब्धकोटिकं ज्ञानमनध्यवसायः। अत एवायं संशयाद्भिद्यते सत्युपलब्धसपक्षासपक्षसंसर्गधर्मद
र्शनादुत्पद्यते उपलब्धाव्यवच्छिन्नोभयकोटिविषय इति लोकप्रसिद्धिः तदनुसारित्वाच्च परीक्षकाणां तदिदमुक्तं प्रसिद्धार्थेषु संज्ञितया आ
म्रादिषु अप्रसिद्धार्थेषु संज्ञितया पनसादिष्विति। व्यासंगान्मनसो विषयांतरासक्तत्वात्। ननु तथा सति तस्मिन् ज्ञानं न जायेतैव। न व्यासंग
शब्देन तत्कार्यस्य विषयांतरार्थित्वातिशयस्य विवक्षितत्वात्। घटपटोपलंभेपि हि घटार्थी घट एव व्यवहरति न पटे। तदिदमुक्तमनर्थित्वा

गु० क्रि० द्वैतीति। विशेषनिश्चयाभावे सतीति शेषः। किमित्यालोचनमात्रमितिमात्रशब्देन विशेषानिश्चयात्मकतां दर्शयति। एतदेव स्फुटयति तत्रेति। वि
६१ शेषसंज्ञाप्रतिपत्तिर्विनिश्चयो न भवतीति निश्चयनिषेधेनानिश्चयात्मकता विवक्षिता न तु निश्चयाभावमात्रं विशेषनिषेधस्य शेषाभ्य
61 नुज्ञाविषयत्वात्। सामान्येन त्वनेन निमित्तेन काचिदत्र संज्ञा प्रवर्त्तेतेति निश्चितमेव विशेषात्का पुनरसौ प्रसिद्धा। प्रसिद्धा वेत्यन
व्यवसाय इत्यर्थः। द्वितीयां विधामाह अनुमानविषयेपीति। नालिकेरद्वीपवासिन इत्यप्रसिद्धगोत्वोपलक्षणपरं। सास्नामात्रदर्शनादित्यन
न्यत्रोपलब्धचेष्टमानावयवविशेषदर्शनोपलक्षणपरं। कोनु खल्वत्र प्राणी स्यात्प्रसिद्धो प्रसिद्धो वेत्यर्थः। यद्यपि कोनु खलु स्यादिति जि
ज्ञासा तथापि तत्कारणो नाश्चयात्मना ज्ञानेन प्रथमं भवितव्यं नहि निश्चितेर्थे जिज्ञासोत्पद्यते नापि सर्वथैवाज्ञात इति॥ ॥स्वप्न
लक्षणां चतुर्थीमविद्यामाह उपरतेति। स्वकार्याद्विरतवहिरिंद्रियवर्गस्य प्रलीनमनसो निरिंद्रियप्रदेशावस्थितांतःकरणस्य इंद्रियद्वारेणे एम०
व यदनुभवनं पूर्वज्ञानप्रत्यपेक्षकं ज्ञानं यत्रासावसत्स्वपि चक्षुरादिव्यापारे चक्षुषा पश्यामीममर्थं श्रोत्रेण शृणोमीत्यनुव्यवसायस्तत्स्वप्न ६१

त्तानां। अयथार्थत्वेप्युपरतेन्द्रियग्रामस्यमावादस्य विपर्ययाद्व्यवच्छेदः नियतकोटिकत्वात्संशयानध्यवसायाभ्यां अनुभवन्नित्यनेन स्मृ
तेः। यद्यपि यथार्थमपि किंचित्स्वप्नज्ञानं भवति यथा हमिह शय्यायां संविष्टस्तिष्ठामीति तथापीन्द्रियद्वारकं नातत्त्वायथार्थैवेति प्रति
पादनार्थमिन्द्रियद्वारेणैवेत्युक्तं। इन्द्रियग्रामोपरमार्थं प्रलीनमनस्कस्येति। तदेतत्प्रश्नपूर्वकं विवृणोति कथमित्यादिना। बुद्धिपू
र्वकादितीच्छापूर्वकः प्रयत्नो विवक्षितः। शरीरव्यापारान् चेष्टालक्षणात्। अहनीति जागरावस्थोपलक्षणं विन्नस्यपरिश्रांतस्य। नि
शीति शयनकाले। विश्रमार्थं परिश्रमोपशमार्थं आहारस्याशितपीतस्य रसादिभावेन परिणामार्थं परिपाकार्थं अदृष्टजनितं प्रयत्नं
निमित्तं निमित्तमपेक्षमाणादात्मनः संबंधात् संयोगात् असमवायिकारणात् तस्मिन्नसति समवायिकारणे क्रियाप्रबंधात् कर्मसंतानात् अंतर्हृ
दयं प्राप्य तस्मिन्नंतर्हृदये। तस्य विवराणि निरिंद्रिय आत्मप्रदेशे। निश्चलत्वं निवृत्तपूर्वक्रियासंतानेन तिष्ठति पुनः सह सैव न चलति
तदेति। ततः किमत आह प्रलीनेति किमतो यद्येवमत आह तस्यामिति। प्रबंधेन प्रस्तारेण। अप्राप्य दृष्टकारितप्रयत्नापेक्ष आत्ममा

गु॰कि॰
६२
62

णसंयोगाकारणमित्यूहनीयं। प्राणनं प्राणः अपाननमपानः तत्संतानप्रवृत्तावात्ममनसोः संयोगविशेषाद् दृष्टादिसचिवेन संयोगमा
त्रव्यावृत्त्या तस्यापङ्क्त्याख्यायस्यत्वस्मात्। एतेन शयनपदार्थः छलतो निराकृत इति मंतव्यं। अस्य तु विषयेष्विति अर्द्धरात्रे स्वप्नो यानादि
कानर्थान्पश्यति न च नेतथ्या वाराणस्यां सुप्तः पाटलिपुत्रे पश्यति न चासौ पाटलिपुत्रे न च ते वाराणसीयाः एवमज्ञातानेवज्ञातान् मन्ता
नेव जीवनः पून एवस्छविएनित्यादि। अनेनाविद्यात्वमस्य दर्शितं स्वप्नेऽवस्थाविशेषे ज्ञानं स्वप्नज्ञानं कर्मधारयपक्षे सुषुप्तत्वानुप
पत्तेः। इंद्रियद्वारेणोवेति मनस्प्रत्यक्षाकारं साक्षात्कारीति चोपलक्षणं लिंगद्वारेणोत्पानुमिताकारं क्वचिदित्यपि द्रष्टव्यं। यथाऽस्मिन् देशे धूमाद
ग्निरयमेवमाहेत्यादि। अस्यांतर्गणिकं भेदमाह तत्त्रिविधमिति। यद्यपि सर्वत्र सर्वेषां कारणत्वमस्ति तथाप्यतिशयमाश्रित्य त्रैविध्यं। तदा
१९ हतत्रेति। कामी — क्रुद्धो वा यमर्थं कामिनीमरातिं वा आदृतः प्रयत्नवान् चिंतयन्स्मरन्स्वपिति निद्राभिभूयते तदा सैव चिंतासंतति गुम॰
स्तज्जनितः संस्कारसंतानः कारणं शब्दस्य कार्ये उपचारात्। प्रत्यक्षाकारं साक्षात्कारवती एकविषयत्वात् कार्यकारणभावाच्च संस्का ६२

रसंततिरेवास्य प्रप्रतीतिरुक्ता। वातदोषादिति धातवोऽसृङ्मांसादयः शरीरधारणात् तेषां दूषकत्वात् दोषाः वातपित्तश्लेष्माणः। यद्वा वात
पित्तश्लेष्माण एव धातवः शरीरस्थितिहेतुत्वात् तद्दोषा उपचयलक्षणा त सम्प्रान्पश्यति। एवं तद्धि हरोऽति वातेति स्वभावादेव वाताधिको वा
त प्रकृतिरिसुच्युते ऽप्यागंतुकेन निमित्तेन क्षुभितवातो वातदूषितः आकाशगमनादीत्यादिपदेन प्रदेशभ्रमणभूकंपादिग्रहणं। एवं पित्तप्रकृतिः
स्वभावत एव पित्ताधिकः पित्तदूषितो वा आगंतुकेन निमित्तेन अग्निप्रवेशात्कनकपर्वतादीत्यादिग्रहणात् मध्याह्नातपरिग्रहादिग्रहणं। त
थाश्लेष्मप्रकृतिः श्लेष्माधिकः श्लेष्मदूषितो वा आगंतुकेन निमित्तेन सरित्समुद्रप्रतरणादीन् प्रपश्यति आदिग्रहणात् रजपर्वतादीन् प्रपश्य
ति। ततो यां विधामाह यदिति। स्वयमनुभूतेषु प्राप्तेषु अननुभूतेषु अप्राप्तेषु च प्रसिद्धेष्वर्थेषु इहजन्मनि प्रतीतेषु अप्रसिद्धेषु चेहजन्मन्य
प्रतीतेषु मध्ये यच्छुभावेदकं गजारोहणछत्रलाभादीत्यादिग्रहणात् पायसभक्षणपर्वतारोहणादीति स्वयं प्राप्तेहजन्मोपलब्धविषयं स्वप
म प्राप्तेहजन्मानुपलब्धविषयं न ब्राह्मणेन सुरापानागम्यागमनादि इहजन्मन्यप्रतीतविषयं न मेरुपृष्ठारोहणे देवतादर्शनमंदाकिनी

पं। आत्मात्मनोऽनेवे स्वप्रल हृत्स्फाति व्याप्ति तु भवन मिति विषो पाणी इति भावः। उपसंहरति एवो तिकमप्राप्तांति धांतिभजतेविद्या॥६

गु०कि० विगाहनादि तत्सर्वं संस्कारधर्मोऽभ्यां। यदि पूर्वदिवसे पुराणादि संकथा श्रवणमप्यभूत् तद्विपरीतमथुमा वेदकं किंभूतं तैलाभ्यंजनो ष्ट्रारोहणादीत्या

६३ दियहणादंधकूपपातपंकमज्जनादि। तत्सर्वमधर्मसंस्काराभ्यां यदि पूर्वदिने कथंचिदस्यार्थस्य चिंतनमभूत्। अस्वंतापसिद्धेषु प्रमाणेनादि संगिलना

63 दिषु पूर्वं चारोपतो प्पाचिंतितेषु। संसर्गे विषयश्चात्र संस्कारेणेन्यते संसृज्यमानविषयस्त्वस्ये वेति। अत एव स्वप्ने निरेवासौ पठीयसीतियेस्वप्ने

वर्णायंतितेमूढमनसोंधकत्याः ॥२३॥ इदंरजतमितिविपर्ययसापितथा भावापन्नेश्चेति स्वप्रज्ञानमध्यपातिस्वप्रज्ञानविषयस्य यत्स्मरणं तदपु

परतेंद्रियग्राममसप्रलीनमनसोभवतियस्य स्वप्नां। तेकमितिप्रसिद्धिः स्वप्नलक्षेसांतो वयवदिशेषो विषयतया स्यात्तीतिमुसमत्यानलुत्रांतभे

वतिनतावर विद्यायांयथार्थत्वात् नापि विद्यायां उपरतेंद्रियग्रामस्येत्यादि स्वप्नलक्षणयोगात् अतिव्याप्त्यानवेदंलक्षणमित्याशंक्याहस्व

प्नांतिकमिति। पूर्वं ज्ञानमप्यत्यवेक्षणादयमसौ दृष्टस्तन्मयापायसंभक्षितमित्याद्यनुसंधानात् स्मृतिरेव तल्लक्षणयोगात्तथा च विद्यापीति। य एम०

थार्थप्रतिपत्तिर्विद्येतिसामान्यलक्षणमुक्तं। सापि चतुर्विधा अविद्यावदिसपरर्थं। किंनामधेयास्ताश्चतस्रोविधा इत्यतआह प्रत्यक्षेति। लक्ष ६३

तेष्वतिपद्यते ॥ नेत्रेति लक्षणं नाम प्रत्यक्षादीनां मध्यस्थाः सा तथोक्ता । तत्र प्रत्यक्षमिति किमिदमनपेक्षितावयवार्थो संज्ञानेत्याह तत्राक्षमक्ष
मिति । प्रतीत्यप्रायतरेतरर्थकर्षं प्रतिगतमक्षं प्रत्यक्षमिति तु गतिसमासः अत्राव्ययीभावे हि प्रत्यक्षा बुद्धिरित्यादि परलिंगतानस्यात् अत्र अक्षशब्दस्य
त्यक्षं पुंडरीकाक्षादिवच्चक्षुष्येच प्रसिद्धि प्राचुर्यात् संकोचो माभूदिति अभिप्रायवानाह अत्र अक्षाणींद्रियाणि । घ्राणादीनि षट् न त्वेकादश सांख्यव
त् । पंच वा वौद्धवत् । उत्कर्षसत्त्वाहंकारप्रभवत्वलक्षणस्यासिद्धेरहंकारादिप्रक्रियाया एवानभ्युपगमात् इंद्रस्यात्मन उपकरणानींद्रियाणीत्यस्य
शरीरादिगतत्वेनातिव्यापकत्वात् शरीरसंयुक्तसाक्षात्करोतीति साधनमित्येवं तु लक्षणं । वौद्धोपि युगपज्ज्ञानानुत्पत्त्या मनोधिकमिंद्रियमंगीकार
यितव्यः अन्यथा व्यासंगानुपपत्तेः । ज्ञानस्याभावात्तु व्यासंगोपपत्तौ च चक्षुरादिकमपि हापयितव्यं इति । तदेतद्ध्यक्षसन्निनिमित्तमुक्तं न तु प्रवृत्ति
निमित्तं स्मृतिसंशयादिसाधारणत्वात् । उपलक्षणं चैतत्लक्षणं तु तद्घटनेनोपलक्षिते साक्षात्कारि यथार्थज्ञानं प्रत्यक्षमिति हि तत्त्वात् । तत्र बुद्ध्यधि
करणं ज्ञानमिति लक्ष्ये ॥ ज्ञानस्य व्यवच्छेदः । विद्याप्रभेदाधिकारात् यथार्थमिति लक्ष्ये अत्र विद्याप्रभेदसंशयादिव्यवच्छेदः । इंद्रियोत्साधत्वेन च साक्षात्का

गु० कि०
६४
64

रिलेलब्धे क्षिप्रं तेनानुमानादित्रयव्यवच्छेद इति। न चैवमिंद्रियतत्संयोगाव्याप्तिर्दोषाय न ह्यत्र प्रत्यक्षं प्रमाणमधिकृतमपि तु बुद्धिः प्रसंगात्तु
यदितज्जिघृक्षितं तदा तत्साधनमिति गम्यतां। तदेतद्विषयतः कारणतः स्वरूपभेदेन प्रपंचयति तद्धीति। हिशब्दः खल्वर्थः। स्पष्टतामाह द्रव्या
दीन्पदार्थानविषयीकुर्वत्स्पष्टमुत्पद्यत इति लोकप्रसिद्धं तत्प्रत्यक्षमित्यर्थः। तदेतदनुपदमेव वक्ष्यति। इसे तदस्मदादीनामिति। द्रव्ये तावत्
त्रिविधे पृथिव्यामप्सु तेजसि चेत्यर्थः। किमविशेषेण सर्वत्रेत्याह महतीति महत्त्ववतीति तेन महत्त्वस्य द्रव्यग्रहणकारणत्वमुक्तं कारणत्वे तस्य
कर्षानुविधानानुपपत्तेः। न ह्यकारणस्य प्रकर्षमकार्यमनुविधत्ते। न च परिमाणप्रकर्षः मुंक्तेऽकारणसंख्यामनादृत्य संभवति ततः परिमा
णप्रकर्षोत्पादद्वारेणात स्यापि प्रत्यक्षकारणत्वमस्ति। तदाहाऽनेकद्रव्यवत्त्वेति। अनेकं द्रव्यमारंभकं येषामवयवानां तेऽनेकद्रव्यास्तद्वत्त्वमनेक
द्रव्यवत्त्वं रूपं चोद्भूतस्वभावं प्रकाशप्रवालोकस्तैः सहितात् चतुष्टयसन्निकर्षात् आत्मा मनो बहिरिंद्रियं ग्राह्यं च द्रव्यमिति चतुष्टयसन्निकर्षात्ध गम०
र्मादिसामग्र्ये च सतिधर्माधर्मौ दिक्कालादीश्वरश्चेति साधारणानि निमित्तानि तेषां समग्राणां भावे सति स्वरूपस्याविपरीतस्यार्थस्यालोचनं निर्विकल्प ६४

कप्रत्यक्षं साक्षात्कारयुत्पद्यत इति भाविनाभसंबंधः नन्वेतत् स्वचरितविरुद्धं सामान्यज्ञानं गुणज्ञानं द्रव्यज्ञानमिति पूर्वपूर्वापेक्षमुत्तरोत्तरमिति हि त्वयैवो
ख्युसारि नमवतु द्रव्यज्ञानमेव प्रथमत इत्याशंक्याह सामान्येति। विशेष्यज्ञानमधिकृत्य तदुक्तं नालोचनमधिकृत्य। आलोचनकाले सर्वेषां योग्य
देशस्थानां स्वोपलब्धसामग्रीसन्निपाते स्फुरणस्यैव मानत्वात् विशेष्यज्ञानं प्रति हि विशेषणज्ञानं कारणं न हि दंडमनुपलभ्य कश्चिद्दंडीति प्र
त्येति। स्वरूपं तु दंडाप्रतीतावपि प्रतिपद्यत एवेति भावः। न च समवायिनो धर्माः द्रव्यस्य व्यंजका इति नियमो गोत्वाद्यप्रतीतावपि तदाश्रयस्य प्रतीतेः
अन्यथा संशयाद्यनुत्पत्तिप्रसंगात् योपि रूपादिर्व्यंजकः सोपि सत्तया न तु स्वज्ञाने न महारजनादिभिभूतधवलिमोपि पटस्य प्रतीतेरिति। तथा
पि सविकल्पकोत्पत्तावेंद्रियार्थयोः सामर्थ्ये निर्विकल्पकसमसमयमेव तदुत्पद्येत सामर्थ्यं पश्चादपि नोत्पद्येतेत्यत्राप्येन देवोत्तरं सामान्यवि
शेषेत्यादि। न हि कार्यविशेषानुविहितभावाभावं सहकारिविशेषमपेक्षमाणस्य सामर्थ्यमपहीयते तथा च सति घटाद्यालोचने क्षुधः प्रकाशा
पेक्षया शक्तिरवसीदेत। ननु विशिष्टं वस्तु नास्त्येव स्वरूपतोधिकं सामान्यादीनां विशेषणानां कल्पितत्वात् व्यावृत्तेश्च व्यावृत्तिमतोऽनन्यत्वात्

गु०किं० तुच्छत्वाच्च न तत्रैमिरिककेशज्ञानवत् वस्त्वननुरोधितयापि न विकल्पज्ञानं प्रत्यक्षं । अत्रापेतरे वोत्तरं सामान्येति । ह्येये सिद्धौ सामान्यादीनां विशेष
६५ णानां व्यावृत्तेश्च विशिष्टतयाऽविरोधेनानुभवसिद्धत्वात् अन्येषां च बाधकानां तत्र तत्र निराकृतत्वात् निराकरिष्यमाणत्वादिति भावः । एतेन यद्य
65 प्यप्रत्यक्षं तन्नाभिलापसंसर्गयोग्यप्रतिभासं यथा निर्विकल्पकं यदभिलापयोग्यप्रतिभासं न तत्प्रत्यक्षं यथा शाब्दलैंगिकविकल्पादि इति संसर्गे वि
पर्यये यो प्रसारव्याप्तौ अभिलापनिमित्तानां सामान्यादीनां परमार्थसत्वे प्रत्यक्षत्वाभिलापसंसर्गयोग्यप्रतिभासत्वयोरविरोधात् न च निर्विकल्प
कस्याप्रत्यक्षत्वप्रयुक्तमभिलापसंसर्गयोग्याप्रतिभासत्वमपि तु तथाप्रतिभाससामग्रीविरहप्रयुक्तं नाभिलापसंसर्गयोग्यप्रतिभासत्वप्रयु
क्तमप्रत्यक्षत्वं शाब्दलैंगिकविकल्पानामपि त्वनिंद्रियकारणत्वप्रयुक्तमिति । अत एवानौपाधिकमस्य साक्षात्कारित्वं मुख्ये बाधकाभावात्
तद्गतत्वेनानुभवाच्च बाधकं विनात्वनुभूयमानस्यावधीरणोऽतिप्रसंगात् । तदिदमुक्तं प्रत्यक्षमुपपद्यत इति । न च साक्षात्कारित्वेपि भ्रांतत्वादस्य प्र
त्यक्षाभासत्वमिति युक्तं तद्भिन्नदेशकालाकारकृतं जात्यादियोजनायां संभवति गेहस्थस्य मरणोऽकुंचिकाचिवरस्थत्ववत् देशवैशसाभावादर्द्दुरा राम० ६५

त्रस्थस्य मध्यान्हे पलस्थवत्कालत्वैकल्यानुपपत्तेः पीतशंखवत्स्वरूपविपर्ययानुपलब्धेः अस्थिरस्य स्थिरत्वेनासमर्थस्य समर्थत्वेनास्थू
लस्य स्थूलत्वेनावभासो विकल्प इति तु दुःस्वप्नदर्शनं क्षणभंगस्य भंगात् दर्पोहस्यापोत्थत्वात् स्वयमुपद्रवाणां विद्रावणादिति। नापि दिन्द्रिय
मित्यादिनामयोजनायामनर्थान्तरः शब्दस्य तदात्मतयावभासनात् भ्रांतत्वसंभवात् नहि इन्द्रियं इन्द्रशब्द इव कश्चिद् व्यवस्थापयितु
दिन्द्रशब्दवाच्योयमिति। न चैतदन्यथा। अयथार्थो तस्य शब्दस्य चिरं नष्टस्य चाक्षुषे विकल्पे कथमवभासो विभ्रमादन्यत्र। न चाचाक्षुषोयमि
तिन कश्चित्तटस्थ एव नु स्मर्यमाणः संज्ञिनमुपलक्षयंति न किंचिदनुपपन्नमिति। न चैवं ग्राह्यादिस्मृतेरिन्द्रियव्यापारव्यवधायकत्वं सहका
रित्वाव्यवधायकत्वानुपपत्तेः तथात्वे चातिप्रसंगादिति संक्षेपः। सामान्यमेव परस्परतो विलक्षणत्वाद्विशेषः॥ सामान्यविशेषाश्च द्रव्यं च गु
णश्च कर्म च तान्येव विशेषणानि व्यवच्छेदकानि तदपेक्षादात्ममनःसंयोगादि सेकदेशोत्कीर्तनेन सर्वमेव पूर्वोक्तं स्मारयति। उदाहरति सदिति॥
इति शब्दः प्रत्येकमभिसंबध्यते। सदिति सत्ताविशिष्टं द्रव्यमिति द्रव्यत्वविशिष्टं पृथिवीति पृथिवीत्वविशिष्टं विषाणीति विषाणद्रव्यविशिष्टं शु

गु०कि०
६६
66

क्तइति शुक्लगुणविशिष्टं नागौरितिगोत्वविशिष्टं गच्छतीति क्रियाविशिष्टं। अथवा सदिति सामान्यद्रव्यगुणकर्मविशिष्टे द्रव्यावगाह्येकमेवेदं
ज्ञानं। एवं द्रव्ये प्रत्यक्षं व्याख्याय गुणे आह रूपेति। अनेकद्रव्यच द्रव्यसमवायादिति महत्त्वद्रव्यसमवायात्। स्वगतविशेषात् उद्भवसमाख्यातात् सामा
न्यविशेषात्। स्वाश्रयसन्निकर्षादिंद्रियेण संयुक्तसमवायादित्यावत्। नियतेंद्रियनिमित्तं नियतमिंद्रियं निमित्तं यस्य चक्षुरेव रूपज्ञानस्य घ्राणमे
वगंधज्ञानस्य त्वगिंद्रियमेव स्पर्शज्ञानस्य तत्रयोक्तं। शब्दस्य त्रितयसन्निकर्षादात्ममनः श्रोत्रसन्निकर्षात् संयोगलक्षणात् श्रोत्रसमवेतस्य तेनै
व श्रोत्रेणैवोपलब्धिः। संख्यादीनां द्रव्ययोग्यतां तत्भूतयोग्यतानां द्रव्यवद्द्वाभ्यामिंद्रियाभ्यामुपलब्धिरित्याह संख्येति। तदुक्तं प्रत्यक्षद्रव्यसमवाया
दिति। सामान्यगुणानां स्नेहस्य विशेषगुणस्यापि कर्मणः। कर्मप्रत्यक्षमित्येके न क्षमन्ते संयोगविभागपरंपरैव केवलमुपलभ्यते यः पुनरयं चल
तीति प्रत्ययः स संयोगविभागानुमितकर्मगोचर इति। तदसत् सिद्धे ह्यप्रत्यक्षत्वे तत्प्रत्ययस्यान्यथा समर्थनमुचितं यथा वायोः न त्वन्यथा इति प्र
संगात् तदेव कुतः सिद्धमिति उच्यतां। न तावदनुपलब्धेरेव तस्याः साध्यत्वात् नाप्युत्तरविनाशित्वादित्यभिचारात् नापि समनंतरदेशसंयोगव्यवहित राम०
६६

त्वात् विभागेन व्यभिचार इति। न परमाणुमात्रविभागवृत्तित्वात् तत एवाप्रसिद्धेश्च। महति द्रव्ये हि वर्तमानं तत्प्रत्यक्षमिष्यते न परमाणौ यदि तत्प्रत्य
क्षं एकस्मिन्नपि कर्मण्यकाण्डसन्नायां चलतीति प्रत्ययः किं न स्यादिति चेत्। संयोगविभागयोरपि तुल्यमेतत् तथा च कथमनुमीयतामपि। कर्मत्वादेव परमाणु
कर्मवदिति चेत् न परमाणुगुणदृष्टान्तेन सर्वगुणानामतीन्द्रियत्वप्रसंगात् स्वाश्रयामहत्त्वमेव तत्र प्रयोजकं न परमाणुगुणत्वमतो रूपादिप्रत्यक्षस्यान
न्यथासिद्धौ तद्बाधश्च दूषणमिति चेत्। तुल्यमेतत्। यदि च पूर्वदेशवियोगोत्तरदेशप्राप्तिपरंपरया गतिरनुमीयते तदा दिशादाविव चलतीति प्रत्ययो न स्या
त् न ह्युपलभ्यमानदेशान्तरप्राप्तिरपि मयूखमालीचलतीति कश्चित्तत्त्वे तत्र देशान्तरप्राप्तिर्न प्रतीयत एव देशान्तरस्य वाकाशादेरप्रतीतेरिति चेत् न तर्ह्य
धनमसेवद्योतस्यापि देशान्तरप्राप्तिरवसीयेत तथा च गतिरपि नानुमीयेत। तस्य भागैरेव संयोगविभागाः प्रतीयन्त इति चेत् गभस्तिमालिनोप्येवमस्तु
तदालोकस्य व्यापकत्वान्न तेन संयोगविभागौ लक्ष्येते इति चेत्। अव्यापकेनापि खद्योतेन तस्य तौ न लक्ष्येते नु घनोऽस्तु खद्युगपत्संचारित्वात् अवयवाव
यवितया संयोगविभागसंभवाद्वा देशान्तरस्य चाकाशादेरनुपलब्धिस्तुल्य यत्रापि तत्त्वेति। अथ द्रव्यत्वे चाविनष्टत्वे च व्यवधानाद्यनुपपत्तौ चाचलत्व

 स्तुषोपलब्ध्यानुपलभ्यमानत्वेनदेशांतरप्राप्तिरनुमीयतेतिमन्यसे। तदेतदुभयत्रापितुल्यं। कथमेकत्रचलत्यन्यत्रनचलतीतिभेदइत्ये
 षादिकं। बुद्ध्यादीनामांतराणांप्रत्यक्षमाहबुद्धीतिद्वयोरात्ममनसोः सन्निकर्षात्संयोगादात्मसमवेतानामितिशेषः। अत्रबुद्धौकेचित्स्वसंवे
 दनंप्रत्यक्षमाहुः अन्येत्वप्रत्यक्षैवबुद्धिः प्राकट्यानुमेयेत्याचक्षते। उभयत्रापिप्रमाणाभावात्। बुद्धिः स्वव्यवहारेवेदनांतरानपेक्षावेदन
त्वात्यत्पुनः स्वतोव्यतिरिक्तवेदनापेक्षंनतद्वेदनंयथाघटादीतिचेन्नपरेणापरवेदनव्यवहारेकर्तव्येवेदनस्यापिवेदनापेक्षितत्वेनवाधित
त्वात्। तत्परिहारेणान्यत्रसाधनेविपक्षगामितयाविरुद्धत्वाच्च। एतेनस्वव्यवहारेसर्वसजातीयानपेक्षंयथाघटोघटव्यवहारइत्यादिनिर
स्तंवेदितव्यं। अनवस्थाप्रसंगस्तुवज्रप्रवेधत्वान्नाभ्युपगमेननिरसनीयः प्रकाशत्वादित्वसाधारणमसिद्धंचेतिविवादाध्यासिवेदनं
वेदनांतरगोचरोवेदनत्वात्पुरुषांतरवेदनवत्स्मर्तव्यस्ववेदनवत् अवेदनेतद्व्यवहारविलोपप्रसंगः। स्वयमेववेदनेपुरुषांतरवेदने
पिवेदनांतरानपेक्षत्वप्रसंगइतिकार्यलिंगानुमेयत्वेतदसिद्धिप्रसंगः वेदनकारणेनैवप्राकट्यव्यवहारयोरुपपत्तेरितिसंक्षे

पः॥ भावेत्यादि। भावः सत्ता एषां सामान्यानां उपलम्भाधारसमवेतानामिति। आश्रययोग्यतां तमन्तरेण योग्यत्वममीषां दर्शयति। अन्यथा परमाण्वादि
ष्वपि सत्तादिकं प्रत्यक्षमापद्येत स्वरूपसंयोग्यताया अविशेषात्। अयोग्यत्वे घटादावप्यनुपलब्धिप्रसंगः। अत एवाह आश्रयग्राहकै
रिन्द्रियैरिति। तत्र सत्तायां गुणत्वे च सर्वेन्द्रियवृत्तित्वं द्रव्यत्वे संख्यादिसामान्ये चैन्द्रियकं पृथिवीत्वादिषु द्वैन्द्रियकं रूपत्वादिषु नियतेन्द्रिय
निमित्तं बुद्धित्वादौ मानसं। द्रव्ये संयोगात् रूपादिषु बुद्ध्यादिषु च संयुक्तसमवायात् रूपत्वादौ संयुक्तसमवेतसमवायात् शब्दे समवायात्
शब्दत्वादिषु समवेतसमवायात्। किमनेन प्रपंचेन इन्द्रियेणाश्रयसन्निकर्षो द्रव्यगुणादीनां ग्रहणादिति केचित्। आश्रयसन्निकर्षा
दिति कोऽर्थः। यत्र तत्समवेतं तस्येन्द्रियेण सन्निकर्षादिति तदेवं परिवर्सं क्षौमपरीधानमनुहरतीव। वयं हि ब्रूमो यदिन्द्रियेण सन्निकृष्टं तत्स
मवायादिति। अभावस्यानुयोग्यप्रतियोगिनो विशेषणभावादिति चानुक्तमपि लभ्यते। तत्र तत्र तद्विशिष्टप्रत्ययस्योपदर्शनादित्यभिप्रा
यवानुपसंहरति इत्येतदिति। अयोगिनामित्यर्थः। योगिप्रत्यक्षमाह अस्मद्विशिष्टानामिति। अस्य विवरणं योगिनामिति। ध्यायि

गु०कि० नामिसर्थः। ते च द्विविधाः युक्तायुक्तभेदात्। तत्र युक्ता इंद्रियेभ्यः प्रसाहृसमास्पात्मन्येवस्क निःआदरेण मनो निधाय वर्त्तमान चिं

६८ तासंतानवंतः। वियुक्तास्तु संतताभ्यासेन परमं वशीकरणमापन्नाः विगतावरणमनसः सर्वेजः प्रद्योतमानमनसो निरवशेषिताभ्यासाः।

68 तत्र युक्तानां समाधिस्थानां योगजधर्मानुगृहीतेन मनसेति आत्मादिकस्य संस्कारप्रचयस्य कामातुरकामिनीज्ञानसाधारणेन न प्रत्य

क्षैकहेतुतानापि प्रमाणपरिगृहीतार्थविषयत्वं भावनाया विप्रोषः धूमेन प्रवर्तनितं च वर्तिनमग्निमनुमाय शीतार्त्तस्य ध्यायत इंध

न निवर्त्तो निवृत्तेपि दहने तस्याक्षाकारस्य प्रत्यक्षत्वापत्तेरत उक्तं योगजधर्मानुगृहीतेनेति। योगाच्च धर्मो जायत इत्यत्र योगविध

य एव प्रमाणं तेषां कर्मविधितुल्ययोगक्षेमत्वात्तेनानुग्रहः सहकारिता तस्यात्मनि तन्नोन्यासि न्नात्मांतरे आकाशे दिशि काले

चाणौ परमाणुषु च चतुर्विधेषु मनस्सु तत्समवेतेषु यथास्वं भवं गुणेषु कर्मसु सामान्येषु विशेषेषु स्वेषु समवाये चावितथं सत्त्वं। गम०

तस्य विरणं स्वरूपदर्शनमिति। यद्यपि स्वात्मान्यात्महादीनाम् पिकदाचिद्विगलितशरीरादिप्रत्ययाभावः क्षणमात्रमात्मान्येव न तथापि विवे ६८

लवद्विद्यासंस्कारमध्यपातितद्विज्ञानंप्रतिपक्षकक्षाप्रवेशपरवशीकृतशरीरंज्वालाकलापकरालीकृतायांभूमाविवकलमबीजंनसं
स्कारांकुरापकल्पनइत्समत्कल्पततयोपेक्ष्ययोगिप्रत्यक्षंदर्शितमितसवधेयं।वियुक्तानामाहवियुक्तानांपुनरिति।तेहिसमाधयःसमा
धिमभावाद्धिकरणधर्माणोऽणिमाद्याःकायसिद्धीर्दूरश्रवणाद्याश्चेंद्रियसिद्धीरासादितवंतस्तथाचतेषांचक्षुरादिनेसूक्ष्मेपिपरमा
एवाद्यैव्यवहितेनागलोकेदेशविकृष्टेसुरसदनादिकेकालविप्रकृष्टेऽतीतादिकेमनसायोगजधर्मानुग्रहरूपात्सामर्थ्यात्ज्ञान
मुत्पद्यतइति।चतुष्टयसन्निकर्षादित्यनेनेंद्रियसन्निकर्षजत्वमुपलक्ष्यते।प्रमाणंतुयोगिप्रत्यक्षेस्वर्गापूर्वदेवतादयःकस्यचित्प्रत्य
क्षाःप्रमेयत्ववस्तुत्वसत्वादिभ्योघटादिवदिति।विपक्षेबाधकंतर्ह्यविधिवैयर्थ्यप्रसंगः।नचप्रयोजकंसर्वमेतत्।स्वकारणसाम
ग्रीसंभवप्रयुक्तंहिकार्यंनतुविषयधर्मप्रमेयत्वादिमात्रप्रयुक्तंनहिप्रमेयत्वात्पार्थिवाःपरमाणवः।आप्यद्रव्याश्रयाःतत्परमा
णवस्तेनापिरसादयःकस्यचिच्चाक्षुषाःप्रमेयत्वाद्रूपादिवदितिशक्यंनचस्वर्गादिषुप्रत्यक्षसामग्रीसंभवतिचक्षुरादीनांस्वसंबद्धवर्त

गु॰कि॰
६९
69

मानप्रतिनियतविषयत्वात् मनसश्च बहिरस्वातंत्र्यात्। कामातुरकामिनीस्वप्नज्ञानादौ चक्षुराद्यनपेक्षस्यापि मनसः स्वातंत्र्यमुपलब्ध
मितिचेत्। न तस्यापीन्द्रियोपघाते न विह्वलत्वात् न त्वविह्वले साक्षात्कारित्वं क्वचिन्मनसो बहिः स्वातंत्र्यमवगतं तथा सत्यंधबधिराद्यभाव
प्रसंगात्। अथोच्यते न तावद्धृदयं करणमनाहत्य सर्वगादौ प्रत्यक्षं साधयामो येनाप्रयोजकत्वमाशंक्येत किं तु कारणपुरस्कारेणैव मनस
श्च यथेन्द्रियोपघातापेक्षस्य बहिरुपप्लवजनकत्वात् नांधबधिराद्यभावप्रसंगः तथा योगजधर्मानुगृहीतस्य बहिरनुपप्लवजनने ने
न्द्रियोपघातादेरन्वयव्यतिरेकाभ्यां मनःसहकारित्वमुपलब्धं ऽवगतं योगजस्यापि धर्मस्य तद्विधैरेवानुपप्लव इति न कश्चिद्दोषः। अप्र
प्रमाणत्वे पुराणादीनां कर्मविशेषपिकः समाम्नात इति। ननु पार्थिवाः परमाणवः आप्यद्रव्याश्रया इति किं न साध्यत इत्युक्ते तत्प्रतिज्ञा
परव्याघातनिरस्ततया किं साध्यतां। तथा हि यदि पृथिवीकार्यद्रव्यानुमितास्ते कथमाप्यद्रव्याश्रयाः आप्यद्रव्याश्रयाश्चेत् कथं पार्थि एम॰
वाः मूर्त्तानां समानदेशताविरोधात् तेषामारंभकत्वस्य विजातीयानारंभकत्वनियतस्यैव धर्मिग्राहकप्रमाणसिद्धत्वात् साधनबाधाच्च। एवं ६९

रसादयः॥ कस्यचिच्चाक्षुषा इत्यत्रापि रसादिषु मध्ये रूपैकव्यंजकमिंद्रियं चक्षुरिति मतं रूपस्य व्यंजकमिति वा प्रथमे प्रतिज्ञापदयोर्व्याघातः
यदि रसादिषु मध्ये रूपमात्रग्राहकं चक्षुः कथं तद्ग्राह्या रसादयः अथ तद्ग्राह्या रसादयः कथं तद्रूपमात्रग्राहकमिति। द्वितीये सिद्धसाधनं मनसः
सर्वविषयत्वादिति। नन्वेवं तवापि व्याघातः स्वर्गादीनामतींद्रियत्वेनैव सिद्धेः तथा च स्वर्गादयः कस्यचित्प्रत्यक्षाः इत्यतींद्रियाः ऐंद्रियका इत्युक्तं
भवति न प्रतिपत्तृभेदेनाविरोधात्। न हि परबुद्ध्यादयोऽप्रत्यक्षा इति स्वयमेषां प्रत्यक्षत्वं विरुध्यते। तथापि योगिनो नातींद्रियार्थदर्शिनः प्राणि
त्वात् अस्मदादिवत् तद्बुद्धिर्न परमाण्वादिविषया बुद्धित्वादस्मदादिबुद्धिवत् तदिंद्रियं नातींद्रियार्थविषयं इंद्रियत्वात् अस्मदादींद्रियवत् इ
त्यादीनां परोक्षसाधनानां का गतिरिति चेत्। मीमांसागुरवो न मीमांसाभिज्ञाः प्राणित्वात् तद्बुद्धिर्न वेदार्थविषयिणी बुद्धित्वात् तन्मनो न तदर्थविष
यं इंद्रियत्वात् तद्वद्दृष्टांता इत्येषां या गतिरिति संक्षेपः। ननु प्रत्यक्षमिति प्रमाकरणविशेष इति सुप्रसिद्धं तत्र कतमदत्र प्रमाणं किं चास्य फलमि
त्यभिसंधाय प्रमाणफलविभागमाह तत्रेति तेषु साक्षात्कारिषु समीचीनज्ञानेषु मध्ये सामान्यविशेषेषु द्रव्यगुणकर्मसमवेतेषु स्वरूपालोचन

गु०क्रि० मात्रमविकल्पकं प्रत्यक्षं प्रमाणं प्रमीयतेऽनेनेति व्युत्पत्त्या प्रमेया द्रव्यादयः पदार्थाः यथायथं सर्व एव परिछेद्या विज्ञेया इति यावत्। परिछेत्ताऽऽ
८० त्मा यथाहं भवं योगी अयोगी च प्रमितिर्द्रव्यादिविषयं ज्ञानं सम्यक् निश्चय इति। अत्र प्रमाकरणं हि प्रमाणमिति प्रमाणस्य लक्षणं। प्रमाविष
70 य इति प्रमेयस्य। प्रमाश्रय इति प्रमातुः। सम्यगनुभूतिरिति प्रमायाः। साक्षात्कारित्वेन विशेषितमेतदेव प्रत्यक्षप्रमायाः। नन्वेवं लक्षणकत
या सामान्यविशेषज्ञानमपि प्रमितिः तथा च तत्र किं प्रमाणमत आह सामान्येति। अविकल्पं ज्ञानाविशिष्टं स्फुटमिति यावत्। किं तत् आलोचन
मात्रं। आलोच्यतेऽनेनेत्यालोचनं इंद्रियार्थसन्निकर्षः स एव मात्राशरीरं यस्य तत्तथोक्तं तत् प्रत्यक्षं प्रमाणं। अस्मिन्नाद्ये नान्यत् प्रमाणमस्ति। कुतः
तस्य फलरूपत्वात् प्रमारूपं फलं यतस्तन्न भवतीत्यर्थः प्रमा हि प्रमाणसाध्या न कार्यमात्रं कारणांतरं तु तदप्यपेक्षत इति। न चैवमनवस्थादोषा
य अनादित्वादिति। प्रमाणफलविभागे प्रकारांतरमाह अथवेति। वाशब्दः समुच्चयेन तु विकल्पे। हेयादिज्ञानोत्पत्तावपि द्रव्यादिज्ञानं प्रमाणमिति राम०
वाक्यार्थः। तदेवाह सर्वेषु पदार्थेषु द्रव्यादिषु विषयेषु अवितथं संशयविपर्ययरहितं अव्यपदेश्यं शब्दाजन्यं यसरि ज्ञानं जायते तत्प्रत्यक्षं प्रमा ८०

णं। शाब्दाजन्यमिति च न सविकल्पकस्यावच्छेदार्थं किं तर्हि चक्षुःसन्नस्मसन्निहितेप्यर्थे व्याप्रियमाणे चक्षुषि शब्दश्रवणानंतरं यद्धटोऽस्तीति ज्ञानं जाय
ते तत्रेरखोपरे स्वाद्यर्थमस्य क्षोपयोगोप शब्दस्यैव कारणत्वात् तद्व्यवच्छेदार्थमिति द्रष्टव्यं। तस्य फलमाह प्रमितिरिति। किं पुनस्तदित्यत आह गुणे
ति। गुणदर्शनमुपादेयत्वज्ञानं दोषदर्शनं हेयत्वज्ञानं माध्यस्थ्यदर्शनं न हेयं नोपादेयमिति ज्ञानं। यद्यपि चैतत्पदार्थस्वरूपमात्रेन स्फुरति
तथापि तज्ज्ञातीयत्वलिंगदर्शनप्रभवतया तस्य प्रत्यक्षफलतया पारंपर्येण तद्वगंतव्यमिति॥ प्रत्यक्षानंतरमुद्देशक्रमानुरोधेनानुमान
लक्षणं व्याख्यातुमारभते। लिंगदर्शनादिति। द्विविधः खल्वनुमानशब्दार्थो भावसाधनः करणसाधनश्च। अनुमितिरनुमानं अनुमीय
तेनेनेत्यनुमानं। तत्र च यद्यपि प्रमाणत्वेन करणव्युत्पादनमेव व्युत्पादयितुमभिमतं तथापि। करणस्य कारकविशेषतया तस्य क्रियासंबंधो
पहितसीममहिमतयाऽनुमितिक्रियास्वरूपोऽत्रादर्शनेनैतदुपदर्शितं भवतीति भावप्रधाननिर्देशमेव निष्कृष्य व्याख्यातवान्। लिंगदर्शनात्संजा
यमानं ज्ञानं लैंगिकं लिंगजन्यमनुमितिरूपं फलमित्यर्थः। बुद्ध्यधिकारात् ज्ञानपदलाभः। तेन लिंगदर्शनजन्यतज्ज्ञोचरसंस्कारेनातिप्रसं

गु०टि०
७१
१

गः। दर्शनं ज्ञानं तथा च दृष्टादनुमिताच्छ्रुतादुपमितात्स्मृताच्च लिंगादित्यर्थः। एतावांस्तु विशेषो यद्वैशेषिकनये शब्दादीन्यनुमानशरीर एवांतर्भवंतीत्य
नुमितानुमानमेव तत्सर्वमिति। संजायमानमिति संशयेनासम्यगर्थानां संशयविपर्ययस्मृतीनां व्युदासः। स्मृतिरपि यथानुभवानतु यथा
र्थेति वक्ष्यमाणत्वात् संजायमानमिति वर्तमानापदेशस्यापि यथार्थत्वोपदर्शनं एव तात्पर्यं। ननु लिंगं किमुच्यत इत्यत आह लिंगं पुनरिति। लिं
गं पुनः प्रसिद्धमेव निरूपधि साध्यसंबंधशालि लिंगमिति लोकप्रसिद्धमेवेत्यर्थः। न चैवंविधमपि लिंगमितिकर्तव्यतामंतरेण स्वरूपमात्रेणा
प्रमाणमतः करणं चतु सन्निहितस्य प्रमाणस्य लक्षणार्थत्वमेव संग्रहश्लोकं पठति अनुमेयेनेति। तल्लिंगमनुमापकमिति तल्लिंगप्रमाणमनु
मापकमनुमितिरूपप्रमाकरणं। एतेन परामृष्यमाणं लिंगमनुमानं तथा च लिंगस्यावांतरव्यापारवत्त्वेन करणत्वमपि संगतमिति भावः। इह
श्लोके तच्छब्दस्योपात्तत्वात्तस्य च नित्यसंबंधयच्छब्दसापेक्षत्वात्पूरयति यदिति। यल्लिंगमनुमेयेन संबद्धमनुमितिक्रियया व्याप्तुमिष्टतमेन साध्य एम०
धर्मविशिष्टेन धर्मिणा यत्संबद्धं संयुक्तसमवेतं विशेषणीभूतं च तस्मिन्नवर्तत इत्यर्थः। एतेन पक्षधर्मता लभ्यते। एवं च सति चतुर्विधाः परमा ७१

णाबोऽनित्यांगंधवत्वादितिभागासिद्धंपरिहृतं। सपक्षेसत्वंदर्शयतिप्रसिद्धंचतदन्विते। चशब्दोऽप्यर्थः तदन्वितेसाध्यधर्मान्वितेसपक्षेप्रसिद्धमपि
तेनसपक्षैकदेशवृत्तेरपिग्रहणं। तच्छब्देनयोग्यतयासाध्यधर्मएवपरामृश्यते। विपक्षाद्व्यावृत्तिमाह तदभावेचनास्त्येव। तदभावेऽनुमेयाभावेऽनु
मेयविपर्यये विपक्षइतियावत्। यथास्वरूपमेवव्याख्यास्यतेऽनुमेयविपरीतेचेति। विपक्षैकदेशवृत्तेरपिनिराकरणार्थमवधारणं। यद्यपिचलिंगेनि
रूपितएवत्रिधर्माःलिंगाभासाइत्यर्थाल्लभ्यन्तेतथाप्यसिद्धत्वादिरूपविशेषसंज्ञार्थमाहविपरीतमिति। एतेनप्रतियोगिनिरूपणाल्लिंगप्रति
पत्तिःशिष्याणांसुकराभवतिलिंगाभासमाहत्वंलिंगमितिचव्यतिरेकेणापिलिंगलक्षणंदर्शितंभवति। अतः उक्तलक्षणात्लिंगात्कालात्ययापदि
ष्टप्रकरणसमत्वरहितादेकेनलिंगलक्षणेनद्वाभ्यांलिंगलक्षणाभ्यांवाशब्दोऽत्रनयद्विपरीतंरहितंतदलिंगंसामान्यतोलिंगाभासंकश्यपात्मजः
कणादोऽब्रवीत्। कापुनस्तस्यविशेषसंज्ञाऽतआहविरुद्धासिद्धसंदिग्धमिति। समाहारद्वंद्वः। एतेनैतद्दर्शितंभवतिएकस्मिन्नपिदूष्येयथायोगं
त्रीणिदूषणानिसंभवंतिपरिपूर्णादिजिज्ञासायांतेनसमस्तान्यपितान्युद्भावनीयानि अपजिज्ञासायांतुक्रमेवदूषणमुद्भाव्यमिति। यद्यपिसिद्धे

गु०क्रि०
७२

हेतुस्वरूपेण उत्तरकालमितरेषां विरुद्धत्वादिदोषाणामवकाश इति प्रथममसिद्धमेव हेत्वाभासमुदाहरंति तथापि यद्यत्स्फुटप्रतिभासंवल
वच्च दूषणं तदेव वचनीयं। अथ वा सिद्धिः पक्षे व्यवस्थितिः सा चाविरुद्धस्यैव साधनस्य घटते न तु विरुद्धस्येति प्रथमं विरुद्धस्यैवोपन्यास इ
ति भावनार्थसमानतंत्रासिद्धस्यापि क्रमस्य व्यतिक्रमः। तत्र संदिग्धो न एकांतिकोऽनैकांतिक इति यावत् साह धर्मद्वयसद्भावेपि न विपक्षाद्व्याव
र्तेत इति एकेन लिंगलक्षणेन विपरीतः यथा शब्दोऽनित्यः प्रमेयत्वादिति। विरुद्धस्तु पक्षधर्मतासद्भावेपि न सपक्षे वर्तते नापि विपक्षाद्व्या
वृत्त इति धर्मद्वयेन विपरीतः यथा नित्यः शब्दः कृतकत्वात्। असिद्धस्त्वेकेन द्वाभ्यां त्रिभिश्च विपरीतो भवति यथा अनित्यः शब्दः सामान्यवत्त्वे सति
चाक्षुषत्वात् इत्येकेन विपरीतः। तथा ह्यस्य सपक्षे घटादौ सद्भावेपि विपक्षाच्च सामान्यादेर्व्यावृत्तावपि पक्षधर्मत्वं नास्तीति। द्वाभ्यां विपरीतो
यथा अनित्यः शब्दो अप्रमेयत्वात् अप्रमेयत्वस्य विपक्षाद्व्यावृत्तावपि न सपक्षे सद्भावो नापि पक्ष इति। त्रिभिश्च विपरीतो यथा अनित्यः श
ब्दः कार्यत्वात् अस्य हि न शब्दे सद्भावो न सपक्षे घटादौ नापि विपक्षाद्व्यावृत्तिरिति। पूर्वोक्तसंग्रहवाक्ये अनुमेयेन संबद्धमित्यस्य विवरणमनु

एम०
७२

मेयेनार्थेन साध्ये। यद्यपि चानुमाने देशकालौ व्यभिचारिणौ न पर्वतादिदेश एव नापि प्रभातादिकाल एव धूमाद्दहनादिसिद्धिरिति सुप्रसिद्धमे
व तथापि क्वचिद्वस्तु मितिविशेषेण नयोरपि प्रयोजकत्वमस्तीति द्योतनार्थमुक्तं देशविशेषे कालविशेषे चेति। एतच्चैवं देशकालाविनाभूतमित्य
ग्रे स्फुटीभविष्यति। प्रसिद्धं च तदन्वितं इत्यस्य विवरणमनुमेयधर्मेति। प्रसिद्धं भूयोभूयो दृष्टव्याप्तिकतया गृहीतं। प्रमाणान्तर इत्यनुपपद्यते। तदभा
वे च नास्त्येवेत्यस्य विवरणमनुमेयविपरीते चेति। व्यतिरेकदृष्टान्तस्यापि प्रामाणिकस्यैव परमुपादानं अन्यथा काल्पनिकस्यापि दृष्टान्तत्वे हेतुहेत्वा
भासव्यवस्थानुपपत्तेः। एतच्च व्यतिरेकवलप्रवृत्ते क्षणभंगादिसाधननिराकरणावसरे तत्तत्प्रदेशे व्याख्यातमेव। तल्लिंगमनुमापकमित्यस्य वि
वरणं तत्प्रसिद्धार्थस्येति। द्वितीयस्य संग्रहवाक्यस्य विवरणं यत्तु यथोक्तादिति। ननु यदि यथोक्तरूपत्रयसंपत्तिमात्रेण गमकत्वं तदा कालात्यया
पदिष्टप्रकरणसमयोरपि गमकत्वं प्राप्नमित्यत आह इत्याह सूत्रकार इति। अपदिश्यते व्यपदिश्यतेऽनेनेत्यपदेशो हेतुः नापदेशोऽनपदे
शोऽहेतुस्तद्विरोधी हेत्वाभास इत्यर्थः। कोऽसौ हेत्वाभास इत्यत आह अप्रसिद्ध इति। दृष्टव्याप्तिकतया ज्ञानं हि प्रसिद्धिः सा च सपक्ष एव चिन्त्यते विरुद्धस्तु

गु०कि० हेत्वाभासः साध्यसजातीये नास्तिप्रस्कृत साध्यविपर्ययव्याप्त इति व्युत्पत्त्या सपक्षे ऽप्रसिद्धो ऽगृहीतव्याप्तिको विरुद्ध एवाभिधीयते इत्यर्थः।
७३ न केवलं विरुद्धो ऽनपदेशः किंतु पक्षे ऽप्यसन्नपि ऽप्रसिद्धो प्यनपदेश इत्यर्थः। न केवलं विरुद्धासिद्धावनपदेशौ किंतु संदिग्धश्चाप्यनैकां
73 तिकश्चानपदेश इत्यर्थः। चकारादनपदेशपदावर्त्तनादन्यो ऽपि कालात्ययापदिष्टप्रकरणसमरूपो हेत्वाभासोस्तीति सूचितं। निःप्रतिप
क्षमेव पटुतरप्रत्यक्षाद्यवाधितमेव हि साध्यं प्रायशः(?) साधनार्हमिति लोकप्रसिद्धत्वाद्युक्तमनभिधानं ऽप्रसिद्धपदेन तु संग्रहः। न पु
नरभावात् तथा च वक्ष्यते ऽप्रसिद्धं च तदन्विति इत्यनेन तयोर्निराकरणमिति रमणीयं। न पुर्यदनुमेयेन संबद्धमित्यनेन। ऽप्राप्त तत्तयोर
पि पक्षधर्मत्वात् व्याख्यानेत्वपक्षधर्मतयां सर्वमसिद्ध एवांतर्भवतीति। न चैवं सत्यन्वयव्यतिरेकिमात्रस्यैवेदं लक्षणमिति वाच्यं केवलान्व
यिनः केवलव्यतिरेकिणोपि प्रमाणसिद्धत्वात् ऽन्यथा वैधर्म्यदृष्टांतव्युत्पादनस्यापि वैयर्थ्यात्। न च रूपत्रयसंपत्तिमतो न गमकत्वं व्यभि राम०
चारात् ऽपि धिकस्य गमकत्वेन उदाहरणप्रसंगात्। सत्त्वं वस्तुगत्या चेत् रूपसंपत्तिः पंचरूपसंपत्तिरेवगमिका ऽप्यनुमानत्रयसाधारणत्वात् ऽप ७३

वाधितविषयत्वासत्प्रतिपक्षत्वयोः पृथगनुदाहरणं प्रयोजकद्वारेण रूपत्रयमुदाहृतं। तथा हि सपक्षे सत्वं प्रयोजकीभूतं केवलान्वयी विप
क्षेऽभावं च प्रयोजकीभूतं केवलव्यतिरेकी उभयं च प्रयोजकीभूतं सान्वयव्यतिरेकी। पक्षधर्मतापि हि तर्हि साधारणत्वान्न वाच्येति चे
न्न तथा सति निराश्रयस्य हेतोर्निरूपणस्याशक्यत्वात्। न हि निराश्रयं किंचिद्विधीयते किंचित्प्रतिषिध्यते वेति। तस्मात्सूक्तं यथोक्ता
त्रिरूपादिति। तत्रानुमेयेन संबद्धं प्रसिद्धं तदन्वितत्वं सन्वयिनो लक्षणं। इदमेव च तदभावे च नास्त्येवेति सहितं व्यतिरेकिणः। समुदितं त्व
न्वयव्यतिरेकिणः। अनुमाजनकत्वं च सामान्यलक्षणं त्रयाणामपि सवगंत संग्रथ्योक्तमपि लिंगमगृहीताविनाभावस्य सकृद्ग्रहणेपि
वाविस्मृताविनाभावस्य न गमकमतश्चाह विधिस्त्विति। तु शब्दस्तादात्म्यतदुत्पत्त्यादेर्व्याप्तिग्रहणोपायत्वनिरासार्थः। विधिस्तु अविना
भावग्रहप्रकारस्तु। कोसावित्यत आह ~~विधिस्त्विति। तु शब्दस्तादात्म्यतदुत्पत्त्यादेर्व्याप्तिग्रहणोपायत्वनिरासार्थः। विधिस्तु अविनाभाव~~
~~ग्रहप्रकारस्तु। कोसावित्यत आह~~ यत्रेति। तदनेनान्वयव्यतिरेकावेव भूयोदर्शनसहकारिणौ तद्ग्रहणोपाय इति दर्शितं। अन्वयव्य

गु०कि० तिरेकाभ्यां प्रथमदर्शनेन व्याप्तिर्गृह्यते शंकामात्रं तु भूयोदर्शनेन निराक्रियत इति मतं क्षुद्रस्य ति एवं प्रसिद्धसमयस्येति। एवमन्वयव्यतिरेकाभ्यां
७४ प्रसिद्धयोग्यहीनः सुदृढप्रमाणेन भूयो भूयः समयोः विनाभावो येन पुरुषेण तस्येत्यर्थः। इदमत्राकूतं यो यमुपाधिमादाय येन सह संबध्यते स नि
74 रुपाध्यवस्थायां न तस्य गमकः यथा वह्निर्धूमस्य सोपाध्यव सोपाध्यवस्थायामप्युपाधेः केवलस्यैव सामर्थ्ये स एव गमको न तदुपहितः यथा
आहार्यपरिणतिभेदस्यैव गमकत्वेन मैत्रेतनयत्वं यत्र रूपाधिः केवलो व्यभिचारी तत्र सोपाधिरपि गमक एव यथा इंधनवान्वह्निर्धूम
स्यात् तत्कस्य हेतोर्विशिष्टस्य निरुपाधित्वादिति। भूयोदर्शनं हि तज्जनितसंस्कारसहितमिंद्रियमुच्यते मणिभेदतत्त्वं चात्र स्फुटमुदाहर
णं। तथाहि मणियैर्यैः विशेषैस्तत्र व्यवहारविषयो भवति धारयितुस्तत्तत्फलसंपादकश्चोन्नीयते ते च सूक्ष्मविशेषाः परीक्षकेण भू
योभिरेव दर्शनैरुन्नीयंते न तथात्रापि प्रथमं काकतालीत्वशुद्धासायतनतः सातत्सोर्द्धेगतिनिश्चयायतनतत्रोपाधिनिरासाय। न चात्र वार रम०
संख्यानियमोपयोगो निरूपाधिसंबंधावबोधावधिनियमादिति। असंदिग्धधूमदर्शनात धूम एवायमविछिन्नमूलोन्नतुवाष्पादिक ७४

मिति ज्ञानात्। तदनेन विप्रतिपन्नं प्रति। शिष्टं धूमवत्त्वादिति प्रयोक्तव्यमिति दर्शितं। तथाविधं प्रति प्रकरणादेरनंगत्वात् न च पूर्वमविनाभाव
ग्रहेऽपि तदनु लिंगग्रहेऽपि विस्मृताविनाभावस्य तद्भवतीत्यत उक्तं साहचर्यानुस्मरणादिति। तदनेन दृष्टांते प्रथमत एकं लिंगग्रहणं तदनु च पक्षे द्वि
तीयं लिंगग्रहणमिति दर्शितं। न चैतावन्मात्रमनुमितेः कारणं तथा हि द्वितीयलिंगग्रहणं वस्तुगत्या लिंगविषयमित्यतावतैव व्याप्तिस्मृतेः सह
कारि लिंगत्वरूपोल्लेखितया वा न तावदाद्यः दूराद्धूमविषयवस्तुत्वज्ञानस्यापि प्रकारांतरायातव्याप्तिस्मृतिं प्रति सहकारित्वप्रसंगात्। द्वितीयस्तु
द्वितीयलिंगदर्शनेनास्त्येव तस्माल्लिंगत्वोल्लेखि तृतीयं लिंगदर्शनमाक्षेप्यमित्याह तदनंतरमग्न्यध्यवसायो भवतीत्यग्निरध्यवसीयतेऽनेनेत्य
ग्न्यध्यवसायः परामर्शः तत्परं तद्भवति प्रमाणं भवतीत्यर्थः। यद्यपि द्वितीयलिंगदर्शनस्य व्याप्तिस्मृत्या सह विनश्यदवस्थस्यैव परामर्शजनकत्वं क्वचिद्दृ
ष्टं तथापि यत्र दृष्टमात्र एव वह्निनिवृत्तो धूमः कालांतरे जिज्ञासावशात् परामृश्यते तत्र द्वयोरपि लिंगदर्शनयोरतीतत्वात् परामर्शज्ञानं प्रति साहचर्या
नुस्मरणमेव कारणं। यस्तु सर्वथा परामर्शज्ञानं नेच्छति तेन वाक्यस्य चतुर्थावयव उपनयो नेष्टव्यः। पक्षधर्मताप्रतिपादनेन तस्योपयोगः। प

गु०क्रि० रार्थानुपमाने स्वार्थोनुमाने तु सा द्वितीयलिंगदर्शनादेवावगतेति किं परार्थे रोति चेत्। न पक्षधर्मता हि व्याप्त्या सह प्रतिसंहितानुमानोपयोगिनी तादृशी
७५ चोपनयेन प्रदर्श्यते न द्वितीयलिंगदर्शनेन। तस्य हि व्याप्त्यनुसंधानरहितं पक्षधर्मतामात्रमेव गोचरो न तदनुमानोपयोगि। तस्मादुपनयार्थो
75 न द्वितीयलिंगदर्शनस्य विषय इति। ततः स्वार्थानुमाने यद्यस्ति तस्योपयोगो नूनं परामर्शोपि तृतीयः स्वीकर्तव्यः नास्ति चेत् परार्थानुमानेपि परा
मर्शकार्यमुपनयो नादरणीय इति। ननु कोयं प्रतिबंधो नाम। अनौपाधिकः संबंध इति ब्रूमः। नन्वयमप्यव्यभिचारस्तत्तन्निदानीभूतोपाध्य
भावस्य वा निश्चये शक्यनिश्चय एव। न च तादात्म्यतदुत्पत्तिनिश्चयव्यतिरेकेणान्यस्तत्र उपायः संभवति। यदि हि कारणमात्मानं वा कार्या
त्मा नैव व्यभिचरतः तदा कार्याकस्मिकत्वप्रसंगस्य निःस्वभावत्वप्रसंगस्य च विपक्षे वृत्तत्वबाधकोपष्टंभस्य संभवात्। अथ वेदेवं यदि तादात्म्यतदुत्पत्ति
रूप एव प्रतिबंधः। ताभ्यां समानोपायो वा तयोरेव प्रतिबंधपर्यवसानं वा। तेन एव वा प्रतिबंधनिश्चयोपायः उपायत्वमपि तयोः सहचारावसाये एम०
वाव्यभिचारशंकानिरासे वा व्यभिचारशंकाप्युपाधिदर्शनात् तच्छंकापावाभूयोभूयः सहचरितयोरप्युपलब्धयोः कयोश्चिदन्यययोर्व्यभिचा ७५

रदर्शनेनानुसंधानमात्रेणैवेति। तत्र सहचारावस्थायस्तावदिंद्रियसन्निकर्षाधीनोत्पत्तिस्तदुत्पत्तिनिश्चयेपि वह्निधूमयोः सिद्ध्यति। व्यभि ल
चारशंकापि योग्यानामुपाधीनां योग्यानुपलंभादेव निरस्ता। अतींद्रियास्तूपाधयोऽन्यत्र प्रमाणपरिदृष्टः शंकिता ऽपि यथा निवर्त्त
न्ते तथा वक्ष्यामः प्रमाणपथ्या न चतीर्णोपाधिशंकानुत्तदुत्पत्तिनिश्चयमप्यास्कंदतीति कथं तेन निवर्त्तनीया। सहचरितयोर्व्यभिचारदर्शनमा
त्रेणानुव्यभिचारशंका कार्यकारणयोरपि समाना तदुत्पत्तिलक्षणविशेषसिद्धौ विपक्षेबाधकप्रमाणप्रवृत्त्या शंकानिवृत्तिरिति यदि तर्ह्य
स्माकमपि स्वाभाविकसंबंधसिद्धौ विपक्षेबाधकप्रमाणप्रवृत्तैव शंकानिवृत्तिरिति समः समाधिः। विशेषस्तु स्वाभाविकसंबंधस्य व्यापकत्वं
तदुत्पत्त्यादेस्तु प्रत्येकमव्यापकत्वं न चोभययगामिकिंचिदेकं साधारणं निमित्तमन्यदस्ति। न च तादात्म्येपि शिंशपात्ववत् वृक्षत्वमपि गमकं संयो
गित्वाविशेषेपि धूमस्यैव वह्निगमकत्ववत् नियामकस्य स्वभावसंबंधानतिरेकात्। न च समानोपायत्वादुभयोरन्यतरानिश्चयेऽन्यतरनिश्च
यो न भवतीति सांप्रतं प्रतिबंधानिश्चयेपि दुताशभस्मनोः कार्यकारणभावावधारणात्। कार्यकारणभावानिश्चये धामधूमयोः प्रतिबं

धाविशेषात् । यदन्तीतमेव वह्निमनुमिमते न च तयोरेव प्रतिबंधः पर्यवस्यति तथा सति रसाद्रूपानुमानं न स्यात् एकसामग्र्यधीनस्वरूपादेर
सत्त्वोगतिरिति चेद्वदतात्वयैव नानयोस्तदुत्पत्तिर्न च तादात्म्यमिति प्रतिज्ञातं न च भेदे सति व्याप्यव्यापकभाव एव कार्यकारणभाव इति प्र
ज्ञाकरश्रीयर्यात्रत्समाधेयं तस्यापापादपि पापीयस्त्वात् । तथा हि नियामकविरहे भिन्नयोरव्यभिचारः शंकाकलंकितत्वात् तदवधारण
इति तामपनेतुं कार्यकारणभावोनेनोपनीतः स चेन्नरूप एव कथं तन्निश्चयेनैवाव्यभिचारनिश्चयः । न चैककालीनैरनुमतं रसेन रूपानु
मानेऽन्यथानुपायमाह यदि च सर्वलोकमतिवाह्य स्वयंकृतलक्षणो व्यवहारस्तदा भेदे सतीत्येतदपि सज्यतां अव्यभिचारमात्रेण तदुत्पत्ति
रिसेवास्तु लाघवाय । तदात्मनोऽप्येतदस्तीति चेत् अस्तु शिंशपापि वृक्षकर्त्तव्यं । कथं तेनैव तत्कर्त्तव्यमिति चेत् को दोषः अप्रसिद्धं सिद्धेन सा
ध्यते न च तदेव सिद्धमसिद्धं चेति चेत् । हेतैवमनागतमपि कथं व्यापकतामात्रेण कारणमसिद्धत्वात् वर्त्तमानमपि व्याप्यतामात्रेण कथं का
र्यं सिद्धत्वात् एवं समानकालेऽपि कथमविनाभावमात्रेण कार्यकारणभूतेऽप्रसिद्धावव्याप्यायामुभयोरप्यसाधकत्वमविशेषात्

तस्मान्नियतपूर्वापरकालत्वमेव कार्यकारणभावः अविनाभावस्तु नियममात्रमिति भावः । न च त एव प्रतिबंधः अद्यतनतपनोदये तस्य स्त-
नतपनोदयानुमानादौ तादात्म्यतदुत्पत्त्योरन्यतरस्याप्यभावात् । तादात्म्यं च न गमकं गमकत्वे प्रस्तुतविरुद्धमेव न हि तदेव निश्चेयं तदेव नि-
श्चायकमिति युक्तं निश्चितानिश्चितयोः परस्परविरोधात् । भवतु वाऽभेदेऽपि गम्यगमकभावः तथापि वृक्षत्वसामान्यस्यानिश्चये तद्विशेष-
शिंशपात्वस्य निश्चय इति दुर्लभं । यस्तु भिन्नयोर्व्यावृत्त्योर्गम्यगमकभावः किं त्वभिन्नाध्यवसेयसंबंधात्तयोरपि तादात्म्यमेव क्रियत इति स-
मर्थ्यते सपक्षभिन्नदेवदत्तसंबंधाच्छत्रकुंडलयोरप्यभेदं व्यवहरन्ति तदा को वारयिता केवलं प्रमाणाभावः स चेहापि समान इति । तस्माद्यन्नोपा-
धिकत्वमेव स्वाभाविकत्वं तदुत्पत्तितादात्म्यालीढयोरप्यव्यभिचारे निरुपाधित्वमेव बीजं । निरुपाधित्वनिश्चयेऽपि यदाशंकापिशाच्यवकाशस्त-
दा कार्यकारणभावादिकमपि स्ववचनप्रतिहतमेव । यद्यपि सोपाधाववश्यं व्यभिचारोऽनुपाधाववश्यमव्यभिचारो व्यभिचारेऽवश्यमुपाधिरव्य-
भिचारेऽवश्यमुपाध्यभावः तथापि यत्र स्फुटो व्यभिचारस्तत्र निष्फलमुपाध्यनुसरणं तस्य तदर्थत्वात् अस्फुटव्यभिचारस्तु तन्निदानोपा

गु०कि०
७७
77

धिमाववनिश्चयेनैव प्रतिपाद्यते। ननु तद्भाव एव कथमवगम्यतां। किमत्र दुर्वचं प्रमाणपदवीमवतीर्णः सोपाधित्वेन शंकनीयत्वात्। अन्यथा
तदुत्पत्त्यादावपि शंकाकलंकस्य दुःपरिहरत्वात् पर्यंततः सप्तघटिकाद्याहारकरणेऽप्यप्रवृत्तिप्रसंगात्। अर्थसंदेहात्तत्र प्रवृत्तिरिति न युक्तं यत्र प्र
माणानि परिभूय शंकापिशाची प्रसरति कुतस्तत्रार्थसंभावनापि। तदयं संक्षेपः व्यभिचार एव प्रतिबंधाभावः उपाधेरेव व्यभिचारशंका प्रमाणनि
श्चित एवोपाधित्वेन शंकनीयः साधने सोपाधिः साध्ये निरुपाधिरेवोपाधित्वेन निश्चेयः अतोन्यथान्यथात्वेन न च प्रमाणपरिदृष्ट एव कश्चि
दुपाधिर्दृश्यते। तथाहि धूमानुमाने प्रत्यक्षोपलम्भात्तावदुपाधयो योग्यानुपलब्धेरेव निरस्ताः प्रमाणांतरपरिदृष्टानामपि व्यापकानामुपा
धीनामुपाधित्वेव ह्नेः सार्वत्रिकत्वप्रसंगः। अव्यापकानामपि नित्यानामुपाधित्वे वह्नेः सर्वदानुवृत्तिप्रसंगः। अनित्यास्तु त्रिविधाः उभयाव्य
भिचारिणः उभयव्यभिचारिणः अन्यतरव्यभिचारिणश्चेति। पूर्वे लक्षणाभावादेव नोपाधयः वह्निमात्राव्यभिचारिणोपि द्विविधाः व्याप्यमात्ररू एम०
पा उभयरूपाश्चेति। तत्र पूर्वे पूर्ववत् उभयरूपास्तु सामग्रीतो नापरे विद्यंते। सा च न क्वचिदुपाधिः धूमस्य वह्निमेव तया स्वभावसंबंधात्। वह्नि ७७
तत्र प्रथमं द्वितीयाद्युपाधित्वं लक्षणाभावादेव नोपाधयः। अन्यतरव्यभिचारिणो द्विविधाः। धूममात्राव्यभिचारिणो वह्निमात्राव्यभिचारिणश्च॥२

जननसामग्र्यां वन्हेरप्यंतर्भावाच्च। न च साध्यधर्मजातीयेतरत्वमुपाधिः तस्य प्रमाणबाधैकमात्रनियतत्वात्। अत एवोपाध्यदर्शनेपि
विरोधिप्रमाणसद्भावनिश्चयव्यग्रतयानुकूलैमनुमितौ विलंबंते। तदेवमनुमानमात्रे द्रष्टव्यं। तर्कश्च सर्वशंकानिवारणपटीयान् वि
जयते। उपाधिलक्षणंतु साधनाव्यापकत्वे सति साध्यव्यापकत्वमित्युक्तमेव। किंपुनर्व्याप्तिग्रहणे प्रमाणं न तावन्मानसं मनसो वहिरस्वातंत्र्या
त्। दर्शनादर्शनरूपं वा द्यसहकारित्वान्नैवमिति चेत्। न असाधारणनिमित्तस्यापेक्षत्वेन प्रमाणांतरतापत्तेः। किंच जातोधूमस्य पूर्वानुभ
वरूपजनितसंस्कारसहकारिणा मनसा रूपसाक्षात्कारजननेंधानंधयोरविशेषापत्तेः। कार्यदर्शनाद्दृष्टेवं कल्प्यत इति चेत् न तस्याप्य
न्यथाप्युपपत्तेः। तस्माद्व्याप्तिः प्रत्यक्षयोः संबंधिनोर्वाह्येंद्रियजसविकल्पकगम्यैव संस्मरणस्य चात्र प्रकारांतरेणापि संभवान्नि
र्विकल्पकस्यापि नापेक्षेति कश्चित् मुसाहृष्यादिवन्निर्विकल्पकेनैव गम्यत इति। तदेवं धूमानुमाने सिद्धवत्सुसाध्यानुमानमात्रेप्यतिदि
शति एवं सर्वत्रेति। एवमुक्तेन प्रकारेण धूमानुमानवत् सर्वत्रानुमाने व्याप्तिनिश्चयस्सर्व्वः। यद्यपि देशकालौ व्यभिचरत इत्युक्तमेव तथाप्य

गु०कि० वमेव निरुपाधिकत्वेन न तावपि गमकाविसाहदेशकालाविनाभूतमिति। एवमिसनुपपद्यते। इतरस्य साध्यधर्मस्य लिंगं यथा मगधायां कृकटवृश्चिक
७८ भीतेन वारेंद्रीयमग्निकारक्षणांत ज्ञानपविषापनोदस्य लिंगं। कालाविनाभूतं च यथा भगवतो योगीश्वरस्य विभुवनपवेशिश्रभृतिशायादिनो पश्चा
78 नं परमाभ्युदयस्य लिंगं। ननु सूत्रविरुद्धमेतत् अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति लैंगिकमिति सूत्रे चतुर्धा संबंधं नियमयति। तथा हि
अस्येदं कार्यं कारणमिति क्वचित्कार्यं क्वचित्कारणं च प्रयोजकीकृत्याभिहितं। यथा तंतुसंयोगात् पटं चरमकारणात् पटानुमानं। वस्त्रागमात्तु
कार्यकारणाभावलक्षण एक एव संबंधः। तद्द्वितीयोदाहरणं स्फुटमेव। विरोध्युदाहरणं तु विस्फूर्जेतमहिं दृष्ट्वा फणीं तत्र तिस्य नकुलस्यानुमानं। य
स्तु नरभूतं वर्षं भूतस्य वाय्वभ्रसंयोगस्य लिंगं कथं विरोधि प्रस्तुतानुकूलमेवेति दूषितं। किमेतावता न स्येकद्वैकोदाहरणे दूषित एव विरोधित्वलक्षणं दू
षितं भवति। न चैवमपि अत्रापि विरोधस्य दुःपरिहरत्वात्। न त्वन्यस्याभावमात्रेणान्यस्याभावो नियमेनगम्यते विरोधित्वे तु तथा संभवति यद्धि चोय राम०
स्य नियमेन प्रतिषेधो यन्निषेधे च यस्य नियमेन विधिस्तयोरेव विरोधात्। समवाय्युदाहरणं यथा वारिसंयुक्तसमवेतउष्णस्पर्शो वारिस्थं तेजो ७८

गमयतीति। तदयं नियमो देशकालाविनाभावमात्रस्य गमकत्वेऽनुपपन्न इत्यत आह शास्त्र इति। अस्येदमिति संबंधमात्रेऽनुमित्यंगत
याप्रतिज्ञातेऽपि निदर्शनार्थं निश्चयेन विशेषेणोदाहरणानि ष्ठं कृत्वा तस्यैव दर्शनार्थं कार्यादिग्रहणं। विप्रतिपन्नः पृच्छति कस्मादिति।
कथमेतदित्यर्थः। तथाह्यस्येदमिति संबंधप्रतिपादकपदेनैव सर्वोपसंग्रहाच्छेषाभिधानं व्यर्थं न च संबंधिपदोपात्तस्यातिप्रसक्तिः शेषपदैर्नि
वार्यते तेन तथा सति शेषपदान्येव संतु कृतमस्येदमिति पदेन। तस्मादेव संबंधिभेदानामधिगतेः। न चैवं सत्यनुमित्यंगस्य चातुर्विध्यमपि तच्छे
ध्यते तस्मादस्येदं कार्यमस्येदं कारणमस्य संयोग्यस्येदं विरोध्यस्येदं समवायीत्यवधारणार्थमेवेत्यर्थः। ज्ञाताभिप्रायस्योत्तरं व्यति
रेकलिंगदर्शनात्। कार्यादिव्यतिरेकेणापि लिंगदर्शनात्। तस्येदमव्यभिचारीति संबंधमात्रमेव गमकं तस्यैव तु शिष्यानुरोधात् विषदी
करणमेतस्य फलं। तच्चोक्तमेव। यत्र कार्यादिव्यतिरेकस्तद्दर्शयति यथाध्वर्युरिति। होतुरित्यनेन सन्निहितयागभूमित्वमुपलयति।
प्रयोगस्त्वयमध्वर्युरविदूरदेशेन होत्रा तद्वान् सन्निहितयागभूमावोंशब्दकर्तृत्वात् पूर्वोपलब्धाध्वर्युवत्। अत्र च कार्यताद्यभावः

गु॰ क्रि॰ स्पष्ट एव। उदाहरणांतरमाह चंद्रोदय इति। न चात्रापि तदनंतरभावित्वमात्रेण कारणत्वमाशंकनीयं अन्यथासिद्धत्वात्। स्वावयवानामुत्तर
७९ देशप्राप्तिरूपायाः समुद्रवृद्धेः परस्परदलविभागरूपस्य च कुमुदविकासस्य पूर्वरूपनिवृत्त्या वुत्तररूपाद्युत्पादनलक्षणस्य च जलप्रसादस्य
75 तत्कालसन्निपातिस्वकारणाधीनकर्मनिबंधनत्वात् कार्यादिव्यतिरिक्तस्यापि लिंगस्य दर्शनात् न्यूनं सूत्रमिति शिष्यभ्रमनिरासार्थमेवो
क्तमेवेत्स्मारयन्नुपसंहरति एवमादि तत्सर्वमिति। अस्येदमव्यभिचारीति संबंधमात्रवचनात् सिद्धं सर्वेषु सूत्रोक्तानां प्रमाणानां सिद्धं कृतमित्यर्थः।
मात्रशब्देन तत्संबंधविशेषस्य कार्यकारणादेर्व्यवच्छेदार्थः। तदेवं सिद्धे लैंगिके तद्भेदं दर्शयति तत्तु द्विविधमिति। तु शब्दोऽवधारणार्थः। द्विविध
मेवेत्यर्थः। नन्वेतत्संज्ञाद्वयमन्वर्थं वा स्यात् तस्मिन् सति पारिभाषिकं वा तत्र प्रथमे सर्वमेवानुमानं दृष्टप्रमाणप्रतीतं सर्वमेव सामान्यतो
गृहीतव्याप्तिकतयैव सामान्यतोदृष्टं भवतीति कथं द्वैविध्यं। द्वितीये तु समानतंत्रन्यायेन त्रिविधत्वं सामान्यतोदृष्टपदे च न तत्रार्थानुभाव इत्यतो एम॰
द्वैविध्यं दर्शयति तत्रेति। तत्र च तयोर्मध्ये दृष्टं प्रसिद्धसाध्ययोरत्यंतजात्यभेदेऽनुमानं। प्रसिद्धं साध्यं ययोस्तौ तथा पक्षसपक्षावित्यर्थः। ए ७९

कस्य हि व्याप्याव्यापकत्वानि साध्यं प्रसिद्धं अन्यस्य तु व्याप्यत्वानि व्याप्तिग्रहणविषयतयैव हि साध्यं प्रसिद्धं तदनयोः पक्षसपक्षयोः जात्यभेदे एक
जात्यभेदे एकजातीयत्वे सति यदनुमानं तद्दृष्टं। यथा गव्येव सास्नाद्युपलम्भाद्देशान्तरे गवि प्रतिपत्तिः सा गौः सास्नावत्त्वात् दृश्यमानगोपिं
डवदिति। अथवा प्रसिद्धलिंगेन सह पूर्वं दृष्टं यत्साध्यं यत्संप्रत्यनुमेयं तयोरत्यंतं जात्यभेदे सतीति ज्ञेयं। तत्र पूर्वं हि गोत्वजातिविशिष्टाया
एवव्यक्तेः सास्नोपलंभात् संप्रत्यपि गोत्वजात्याक्रांताया एवव्यक्तेरनुमानमित्यत्यंतं जात्यभेदः। सामान्यतोदृष्टमुदाहरति प्रसिद्धसाध्ययोरि
ति। पूर्ववत्। अत्यंतं जातिभेदे सति लिंगं चानुमेयधर्मश्च लिंगानुमेयधर्मौ तयोः सामान्ये लिंगानुमेयधर्मसामान्येतयोरनुवृत्तितः लिंग
सामान्यस्य साध्यसामान्येन सहाविनाभावात् यदनुमानं तत्सामान्यतोदृष्टं। यथा कर्षकवणिग्राजपुरुषाणां प्रवृत्तेः फलवत्त्वमुपल
भ्य वर्णाश्रमिणामपि दृष्टप्रयोजनमनुद्दिश्य प्रवर्त्तमानानां प्रवृत्तेः फलानुमानं। अत्र हि सस्यादिकं कांचनादिकं वाजिवारणादिकं यथा
संख्यं त्रयाणां फलं। वर्णाश्रमिणां च प्रवृत्तेः स्वर्गः फलमित्यत्यंतं जातिभेदः। सिद्धसाध्यतापरिहारार्थं च दृष्टं प्रयोजनमनुद्दिश्येति। अ

गु०क्रि० नुमानं च प्रवृत्तिसामान्यस्य फलत्वत्सामान्येनाविनाभावात्। अत एव सामान्यतो दृष्टं तेनैवाकारेण नियमदर्शनात् स्वर्गादिफलविशेषलाभस्य
८० पक्षधर्मतादुर्लभादिति। तदेवं प्रमाणशब्दस्योभयप्रधानत्वे करणव्युत्पत्तिसिद्धिः फलमंतरेण न संगच्छते अतः प्रमाणफलविभागं दर्शयति तत्रेति। त
४० त्रतयोर्मध्ये लिंगदर्शनं प्रमाणं प्रमाणमिति प्रमाकरणमित्यर्थः। प्रमितिरग्निज्ञानं प्रमाकरणस्य फलं यद्यपि लिंगदर्शनस्य परामर्शरूपस्य
प्रतिपत्त्यनुबंधितया लिंगमेव विषयः तथापि व्यापारानुबंधितया वन्हिरेव विषय इति करणफलयोर्व्यधिकरणत्वं। नन्वेवं प्रमाणप्रमेयभावो
न तावन्नियतः सोपाधिकत्वात् उपाधीनां चानियतत्वात् तथा च सति यन्नियतं न भवति न तत्परमार्थसत् यथा रज्वारोपितं सर्पत्वमिति यु
क्त्यनुसारात् प्रमाणप्रमेयभावस्य काल्पनिकत्वमेवापतितमत आह अथ चेति। सत्यमयमनियतः प्रमाणप्रमेयभावो न चापरमार्थस
त्त्वं उपाधीनां नियतत्वात् न हि यदेचयेनोपाधिना प्रमाणमिष्यते तदेव तेनोपाधिना तन्न्येष्यत इति कस्याप्यभ्युपगमः। एकोपाधिसंभवे राम०
उपाध्यंतरमपि संभवतीति चेत्। किं नः छिन्नं भवति हि सन्त्ययं पार्थिवो द्रव्यं घटश्चेति तद्वत् अग्निज्ञानमेव यद्रूपमरूपलिंगदर्शनस्य फलमासी ८०

त्तदेव प्रमाणं प्रमाकरणं प्रमितिः प्रमा कासा ऽप्यौगिणदोषमात्मस्य परदर्शनं हेयोपादेयोपेक्षणीयेत्वप्रतिपत्तिरित्यर्थः। वस्तुस्वरूपमात्रदर्शने च
तज्जातीयत्वादिलिंगप्रतिसंधानप्रकारेण हेयोपादेयत्वादिकं न स्फुरति उपेक्षाबुद्धिः हेयोपादेययोरन्यास्तीति व्यक्तमेवेति। उपसंहरति एतत्स्व
निश्चितार्थेमिति। स्वनिश्चितमिति भावे क्तः स्वनिश्चयार्थमित्यर्थः। स्वनिश्चयो हि स्वज्ञाननमस्य पंचावयववाक्याद्यपरामर्शेपि मुक्तः विपर्ये
स्तादिप्रतिपादने तु सकलपरिकरशुद्धिवक्ष्यमाणोपेक्षणीये त्यर्थः॥ ॥इह खलु शब्दे त्रिधा विप्रतिपत्तिः प्रामाण्यतो भेदतो लक्षणतश्च। तत्र प्रथमः
कल्पः स्ववचनविरोधादेव निरस्तः तत्प्रामाण्यमनभ्युपगम्य विवक्षितार्थस्य प्रतिपादयितुमशक्यत्वात् प्रतिपादने वा तत एव प्रामाण्यसिद्धेः। ननु
यत्र यस्य संबंधो नास्ति तत्र न तस्य प्रामाण्यं यथा दहने प्रतिबद्धस्य रासभस्य नास्ति च शब्दस्य बहिरर्थेन संबंध इति चेत्। न ह्यविनाभावरूपसं
बंधाभावादप्रामाण्यं तत्संबंधमात्राभावाद्वा प्रथमे चक्षुषोपि रूपज्ञाने प्रामाण्यं न हि तत्र तस्याविनाभावः न च चक्षुरपि रूपकार्यत्वादेव रूपं
प्रकाशयतीति वाच्यं तथा सति तत्कृतत्वाद्रसादीनपि गमयेत् रूपरसादिसमुदायो हि घटादिर्विषयः अविनाभाववत्तानं चापेक्ष्य तेन तस्याविनाभा

गु० कि० वस्त्वैषम हिमायदयं सन्त्रामात्रेणागमयन्ति तथात्वेवाधूमादपि च क्षुष इव सन्नामात्रावच्छितादेव वह्निः प्रतीयेत अपि च ज्ञानसमसमयो वाथ्येः प्र
८१ काशेत तदनंतरसमयो वा। अघेन ग्राह्यग्राहकभावनियमः सव्येतरविषाणयोरिव। न तस्माच्चक्षुषो जन्म स्वकारणादेवायमस्य स्वभाव
६१ त्वाभोपदनात्मानमप्यकारणमपि कारणत्वाविशेषेपि रूपमेवात्ता तमेव सतप्रकाशयतीति रूपोपलब्धिकार्यदर्शनबलादेव व्यवस्थाप्यते तस्मा
शक्यापह्नवत्वादिति चेत् एवं तर्हि यस्मयत्रेसादिव्यापकानुपलब्धिस्त्वयेवानैकांतीकृता स्वभावसंबंधस्य दर्शित इति किमत्र वक्तव्यं। न स्मा
द्यथा चक्षुरादिषु यथार्थानुभवजननेन निबंधनः प्रमाणव्यवहारस्तथा तन्निबंधनः शब्दस्यापि तदनुगुणः स्वभावभेदः स्वकारणादाया
तो व्यवस्थाप्यते यतस्तत्र संकेतोपधानः तं तमर्थं प्रतिपादयति यद्यपि संकेतः पुरुषाधीनत्वादनियतः तथापि यदायस्य पदस्य त्वेयत्प्रति
पादकत्वं तदानस्योपाधिनियमस्य कर्तुमशक्यत्वादित्यप्रामाण्यकथासु दूरप्रतिहतेति न देलक्षणे च विप्रतिपत्तिरवशिष्यते। न त्वभेदेपि व्यावर्त्त एम०
कधर्मयोगादेव सिद्धमिति लक्षणां च तथातनस्तदेव निरूपयितुमुचितमित्यभिप्रायेण सिद्धवदाह शाब्दादीनामप्यनुमानेंतर्भाव इति यद्यपि समान ८१

तंतून्यायादिषुउपन्यासक्रमेणांतर्भावक्रमोपिदर्शयितुमुचितस्तथापिशाब्दस्यबुद्धिविषयत्वान्नियतविषयोपमानादुत्कर्षः। शाब्दादीनांसिद्ध
प्रमाणभावानामनुमानेंतर्भावः। अपिशाब्दस्यचउपमानोपमानादिप्रमाणापेक्षया। अथवाशाब्दादीनामनुमानेंतर्भावेऽभावादीनांप्रत्यक्षेपी
तियोजना। अत्रहेतुमाह समानविधित्वात् समानविषयत्वात्समानप्रवृत्तिप्रकारत्वात्। विजातीयलक्षणानांक्रांतत्वादितियावत्। अप्रतिबद्ध
त्वेऽप्रामाण्यमेवसाक्षात्प्रतिबद्धत्वेचप्रत्यक्षांतर्भावः परंपराप्रतिबद्धत्वेचानुमानएवांतर्भावइतिभावः। ननुसमानविधित्वमेवासिद्धमत
आह यथाप्रसिद्धसमयस्येति। समयः संबंधमात्रमव्यभिचारइतियावत् प्रसिद्धः समयोऽव्यभिचारोयस्यसतथा। लिंगदर्शनप्रसिद्ध्यनु
सारणाभ्यांलिंगदर्शनंचप्रसिद्धेव्याप्तेरनुस्मरणंच। यथातीन्द्रियेऽनुमानंभवतिएवमनुमानप्रवृत्तिप्रकारंस्मारयितातिदिशतितथाशब्दादिभ्यो
पीति। इदमत्राकूतं यद्यप्येतेपदार्थानमिथः संसर्गवंतोवाक्यत्वादितिव्यधिकरणंपदार्थत्वादिचानैकांतिकंपदैःस्मारितत्वादिसपितथायद्यपिचै
तानिपदानिस्मारितार्थसंसर्गवंतितत्स्मारकत्वादिसाध्यसाध्याभावः नह्यत्रसंसर्गःसंयोगःसमवायस्तादात्म्यंविशेषणविशेष्यभावोवासंभवति

गु०कि० त्ताप्यज्ञापकभावस्तस्मात् तन्त्रेणानुमानात् मौर्वकादिभिर्नेष्यते न च लिंगतयाज्ञापकत्वं यल्लिंगस्य विषयः तदेव तस्य विषयः परस्परः
८२ श्रयप्रसंगात् तदुपलंभे हि व्याप्तिसिद्धिः तत्सिद्धौ तदनुमानमिति तस्याप्याकांक्षादिमद्भिः पदैः स्मारितत्वात् गामभ्याजेतिपदार्थवदितिसात्।
न च विशेषासिद्धिर्दोषः संसर्गस्य संसृज्यमानविशेषादेव विशिष्टत्वात्। यद्वै तानि पदानि स्मारितपदार्थे॥ संसर्गज्ञानपूर्वकाणि आकां
क्षादिमत्त्वे सति तत्स्मारकत्वात् गामभ्याजेतिपदकदंबवत्। न चैवमर्थासिद्धिः ज्ञानावच्छेदकतयैव तत्सिद्धेः तस्य च संसृज्यमानोपहितस्यैवा
वच्छेदकत्वात् न विशेषाप्रतिलंभ इति। तदेवं आप्तेनैयायिकादयः प्रत्यवतिष्ठन्ते किं पुनरत्र प्रथमानुमाने साध्यं एते पदार्थाः संसर्गवंतः
संसृष्टा एवेति नियमो वा संभावितसंसर्गा इति वा। तत्र न प्रथमः अपनाप्तोक्तपदकदंबस्मारितैरनैकांतात्। आप्तोक्तत्वविशेषणान्नैवमिति चे
त् न वाक्यार्थप्रतीतेः प्राक् तदसिद्धेः। न त्वविप्रलंभकमात्रमिहाप्तशब्देन विवक्षितं तदुक्तेरपि पदार्थसंसर्गव्यभिचारात्। अपि तु तदनुभव रम०
प्रामाण्यमपि न चैतच्छक्यमसर्वज्ञेन सर्वदा सर्वत्रायंप्रसज्ञानवानिति निश्चेतुं भ्रांतेः पुरुषधर्मत्वात्। यत्र क्वचिदविप्रलंभमनाप्तस्याप्यस्तीति न ते ८२

नोपयोगः। ततोऽस्मिन्नर्थेऽयमश्रांत इति केनचिदुपायेन ग्राह्यं। न चैतत्संसर्गविशेषमप्रतीत्य प्रत्येतुं शक्यं। बुद्धेरर्थभेदमंतरेणानिरूपयितुमश

क्यत्वात्। पदार्थमात्रे चाश्रांतत्वसिद्धावपि न किंचित् अनाप्तसाधारणात्। नापि द्वितीयः योग्यतामात्रसिद्धावपि संसर्गानिश्चयात्। वाक्यस्य च तदेकफ

लकत्वात्। योग्यतामात्रस्य च प्रागेव सिद्धेः। अन्यथा तदसिद्धावासन्नसाकांक्षपदस्मारितत्वादित्येव हेतुः तथा चाग्निना सिंचेदित्यादिस्मारितैरने

कांतः। तथाविधानां सर्वेषां संसर्गायोग्यत्वादिति। एवं द्वितीयेपि प्रयोगे हेतुराकांक्षादिमत्त्वे सतीति तत्र चाकांक्षा पदार्थो न तावद्विशेषणविशेष्यभा

वो न तद्योग्यता नाप्यविनाभावमात्रं नापि विशेषाक्षिप्तसामान्याविनाविनाभावः नापि प्रतिपत्तुर्जिज्ञासा किं तर्हि गुणक्रियाद्यशेषविशेषजिज्ञा

सायामपि पदस्मारितविशेषजिज्ञासाकांक्षेति निरूपितं। तत्किमस्यां जातायामन्वयप्रत्ययोऽथ ज्ञातायामिति। तत्र प्रथमे नयाव्यभिचारनि

वर्त्तनाय हेतुर्न विशेषणीयो मनःसंयोगादिवत्समभिमात्रेणोपयोगात् आसत्तियोग्यतामात्रविशिष्टस्य निश्चितोपगमकोऽयमुपैति पुत्रो राज्ञः

पुरुषोयमपसार्यतामित्यादौ व्यभिचारात् द्वितीयस्तु स्यादपि यद्यनुमानुराकांक्षाज्ञानवैधुर्यादन्वयप्रत्ययो न जायते न त्वेतदस्ति आसत्तियोग्यता

गु०टि० मात्रप्रतिसंधानादेव साकांक्षस्य वाक्यार्थप्रत्ययात् निराकांक्षस्य च तदभावात् सत्तामात्रेणाचोपपन्नावनुपलभ्यमानकल्पनानवकाशात् न चा
८३ कांक्षस्य वाक्यार्थप्रत्ययात् निराकांक्षस्य च तदभावात् सत्तामात्रेणाचोपपन्नावनुपलभ्यमानकल्पनानवकाशात् न चाकांक्षायां सत्यामप्य
83 वश्यंप्रवाक्यार्थप्रत्ययः । यदा हि अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामिति वक्त्रोच्चारः प्रतिश्रोता च व्यासंगादिना निमित्तेनायमुपैति पुत्रइसश्रुते
ऽराज्ञः पुरुषोऽपसार्यतामिति शृणोति तदा तस्याकांक्षाविरहे सतिपदकंवकलं न च स्मारितार्थसंसर्गज्ञानपूर्वकत्वमिति । स्यादेतत् यावत्समभिव्या
हृतत्वेनाप्रोक्तत्वे न च विशेषिते हेतौ नायं दोषः एवं च कतिपयपदश्राविणां यः कश्चित् क्वचित् संसर्गप्रत्ययः स सर्वोऽलिंगएव लिंगत्वाध्यारोपा
त् असंसर्गाग्रहमात्रेणावा तत्संसर्गस्य व्यवहारात् । न चैवं सति संसर्गो न सिध्यति आप्तवाक्ये श्रुतास्तिद्धेः मेवं सर्वविषया प्रत्यक्षस्यासिद्धेः यत्र क्वचिदप्रत्य
क्षस्यानैकान्तिकत्वात् । प्रकृतविषये चाप्रत्यक्षसिद्धौ संसर्गे विशेषस्य प्रागेव सिद्ध्युपगमात् किमनुमानेन तद्भावनीयं न च सर्वत्र जिज्ञासानिबंधनं अ राम०
जिज्ञासोरपि वाक्यार्थप्रत्ययात् । आकांक्षापदार्थस्तर्हि कः जिज्ञासां प्रतियोग्यता । सा च स्मारिततदाक्षिप्ताविनाभावे सति श्रोतरि तदुत्साद्यसं ८३

सर्गावगमप्रागभावः। नचैषोपि स्वज्ञानमपेक्षते प्रतियोगिनिरूपणाधीननिरूपणत्वात्तदभावस्य तस्य च विषयनिरूप्यत्वादिति सिद्धमनु
मानात्पृथक्त्वं शब्दस्येति। अत्रोच्यते संसृष्टा एवेति नियम एव साध्यः आप्तोक्तत्वेन च विशेषणान्न व्यभिचारः। नच संसर्गविशेषनिश्चयमं
तरेणाप्तोक्तत्वमशक्यनिश्चयं तथा हि निपुणं तावदालोचयता युष्मान् यदापि भवतां शब्दः पृथक्प्रमाणं स्वीकृतः तदापि किं शब्दमात्रा
द्विवक्षितार्थप्रतिपत्तिः आहोस्विदाप्तोक्तत्वसहिताच्छब्दविशेषात्। न प्रथमः अनाप्तवाक्येन व्यभिचारात्। ननु तत्राप्यर्थप्रतिपत्तिर्जा
यत एव कथमन्यथा ततः प्रवर्तेते इतरथा तु द्राविडवचनेष्विव गौडदेशीयस्य प्रवृत्तिसंकल्पोपि न स्यात् किंतु जातार्थप्रतिपत्तिः प्रामाण्यसं
शयकलंकितत्वात् न निःशंकप्रवृत्तिरूपयोगिनीति प्रामाण्यनिश्चयार्थमाप्तोक्तत्वावधारणप्रयासः। ननु लिंगमपि तदानीमर्थज्ञानं जनय
त्येव केवलं तत्प्रामाण्यार्थमविनाभावादिप्रतिसंधानमिति कथं न कल्प्यते कथमन्यथा लिंगाभासेपि प्रवृत्तिसंभवः। भवेदेवं यदि शब्दवत्सामान्येनालिंग
मपि गमकं स्यात् न हि धूमस्वरूपमात्रमेव लिंगं अपि तु साध्येन निरुपाधिसंबंधशालित्वाबाधितविषयत्वादिरूपसंपन्नमेव तथा। तथा च साध्ये निरू

गु॰ क्रि॰ पाधिसंबंधशालित्वस्य च साध्यं विनापि भविष्यतीति कुतः शंकाकलंकावकाशः। प्रामाण्यालिंगितस्यैव तद्रूपत्वात्। न चैतच्छब्देपि समानं न हि शब्दमात्रं वि
८४ वक्षितार्थप्रतिपादकं घटशब्दस्यापि पटार्थप्रतिपादकत्वापत्तेः नाप्यर्थप्रतिपादकत्वमात्रं शब्दापशब्दविवेकानुपपत्तेः तद्विभागव्यवस्थापकव्या
84 करणादिवैयर्थ्याच्च। किंतु यः शब्दो यदुपाधिसंबंधाद्यस्मिन्नर्थे आप्तेन संकेतितः स एव तस्य प्रतिपादक इति। न चैतच्छब्दमात्रे संभवतीति न चैवं स
ति सृण्येव जर्भरी तुर्फरीतु इत्यादिवेदवाक्यात् आप्तोक्तत्वमात्रप्रतिसंधानादेवाविदितपदपदार्थस्याप्यर्थप्रतीतिप्रसंगः न ह्याप्तेनोच्चारणमात्रं
तदुक्तत्वं किंतु संगतिमत्तया प्रतिपादनं। कथं तर्हि शब्दाभासे प्रवृत्तिसंभवः अपशब्द एव शब्दत्वाध्यारोपात् अलिंग एव लिंगाध्यारोपवत्। यथा च लं
तीपताकां दृष्ट्वा वायुर्वातीत्यादि दृष्टं विनाभावशालित्वेपि पटुतराभ्यासदशापन्नत्वेन मुहूर्तमनुमितौ न विलंबते तथा शब्देपीति न कश्चिद्विशेषः। अ
न्यथाप्तोपदेशः शब्द इति लक्षणस्य निर्लक्ष्यतापत्तेः। द्वितीये तु यदि संसर्गावगमात्पूर्वं मशकपुमाप्तत्वावधारणं तदानीमाप्तोपदेशः शब्द इति दुः राम॰
परिहरमन्योन्याश्रयत्वं यद्येन रूपेण न निश्चीयते न तत्तथा व्यवह्रियते यथा ख्यापुरुषः सर्वज्ञत्वेन न निश्चीयते च विवादाध्यासितः पुरुषश्चा ८४

प्रत्वेनेतिचौक्ताभिमतव्यापकानुपलब्धेः स्वशिरसि पातितो भवतीति। यदि तूभयोः भ्रमः समाधिदोषो वा ननु तर्हि विषयमेव पर्यनुयोज्य इति।
एतेन द्वितीयेप्यनुमाने दूषणं प्रत्युक्तं। यत्तु नराकांक्षायां सत्यामपि कचित्संसर्गावगमो न भवतीति यद्यनुकूलमेवैतत्। नहि सति भावमात्रं कारण
त्वं न च केवलाकांक्षायोग्यतासन्निधिरहिताकारणं अपि तु समुदितास्तथा च समुदायात्कारणैकदेशमात्रे व्यभिचारदर्शनं भ्रमः स्थिरदंडादीनाम
म॰प्रा॰७ पि कारणत्वं खंडयति। आकांक्षाव्यतिरेकेण। पिं कुचिद्भवतीति चेत्। इदं तु शकं संसर्गावगमाभावो व्याकांक्षेति दर्शितं। न च भावः स्वप्रागभावमनु
पमृघ जायते न चायमपि सत्यथा हेतुः तथा सति सर्वत्र सदा सर्वस्य वाक्यार्थप्रत्ययप्रसंगात् अस्मदादीनामसर्वज्ञानामनादौ संसारे संसर्गाव
गमप्रागभावः केनापि मनास्ति स्मारितनदाक्षिप्ताविनाभावे सतीति विशेषणेन ज्ञानमेव प्रकारांतरेणावगम्येतद्दलत्वं नैय्यायिकेषु ति धार्ष्ट्येन॥
ननु य एव वैदिकास्त एव लौकिका इति न्यायात् लोके चेदाप्तोक्तत्वधारणा पदार्थनिश्चयः तर्हि वेदवाक्येपि तथा स्यात् न चात्र कर्तृमात्रमेव सं
भावितमत आह श्रुतिस्मृति। श्रुतिस्मृती एव लक्षणं स्वरूपं यस्याम्नायस्य वाक्यसमुदायस्य तथा संदिग्धाप्रकर्तृकत्वेनैतयोर्दृदाहरणं न केव

गु०कि० लं लौकिकवाक्यसमुदायः श्रुतिस्मृतिलक्षणोप्याम्नायो वक्तुः प्रामाण्यमपेक्ष्य प्रमाणायकः। नन्वाप्तोक्तत्वादिति साध्यविपर्ययव्याप्तोयं हेतुः
८५ विप्रलिप्साविरहेपि भ्रमप्रमादादीनां पुरुषेऽवश्यंभावितया तच्छंकापंकलेपस्य दुरपह्नवत्वात् नित्यत्वे पुनरस्य शंकैव नास्त्यत आह तद्वच
85 नादाम्नायप्रामाण्यमिति सूत्रकारवचनादित्यर्थः। तदिति सन्ने न चास्मद्बुद्धिभ्यो लिंगमृषेरिति सूत्रे प्रतिपादितस्यास्मद्विशिष्टस्य वक्तुः ईश्व
रस्य परामर्षस्तद्वचनात्तेन प्रणयनादाम्नायस्य प्रामाण्यं यथार्थानुभवजनकत्वप्रयुक्तं हि प्रमाण्यं न तु नित्यत्वप्रयुक्तं तदपि दोषाभावनिबंध
नं। तच्च धर्मिग्राहकमानादेवेश्वरे सिद्धमिति भावः। प्रयोगस्तु आप्तोक्ता वेदाः महाजनपरिगृहीतत्वात् यत्पुनरनाप्तोक्तं न तन्महाजनपरिगृ
हीतं यथा रथ्यापुरुषवाक्यं। इदानीं श्रूयमाणवेदवाक्यसजातीयेषु वेदस्वाक्येषु स्वतंत्रपुरुषपूर्वकत्वं चाप्तोक्तत्वं सर्वदर्शनीतन्प्रातिपुरुषानुष्ठीय
मानार्थत्वं च महाजनपरिग्रहार्थः। सिद्धे च प्रामाण्ये क्वचित्फलाभावः कर्मकर्तृसाधनवैगुण्यनिबंधनो न व्यभिचारायनतस्माकल्पेन तत एव फ राम०
ल दर्शनात्। तदेवं वैदिकवाक्यसमुदायस्यान्यथागमनेऽप्यवरणासंभवे चार्वाकिकलेश्ववसिश्रोतरिचावहितेय उपलम्भानुपलंभनंतद्भूयरिव ८५

दनित्यत्वैकनिबंधनमिति यद्यपि प्रत्यक्षत एव परिच्छिन्नं तथाप्यस्मर्यमाणकर्तृकत्वादिना वैधर्म्येण यः प्रत्यवतिष्ठते तदर्थमाह लिंगाच्चानि
त्य इति। न केवलं प्रत्यक्षाल्लिंगादप्यनित्य इति। अनित्यत्वप्रतिपादकं तु प्रत्यक्षमनन्यथासिद्धत्वादुःपरिहरं नित्यत्वप्रतिपादकं तु प्रत्यभिज्ञा
नमन्यथापि संगच्छते। प्रस्तुतानुमानमप्यस्माकमत्रार्थेऽस्ति। तदेवमुभयप्रमाणसिद्धे वस्तुनि वैधर्म्यमात्रमप्रयोजकमिति भावः। अनुमान
मेव दर्शयति बुद्धिपूर्वा वाक्यकृतिरिति। यद्वा हि वर्णमात्रस्यैवानित्यतामुपपादयिष्यामः कुतस्तद्घटितस्य समूहस्य पदस्य कुतस्तद्विशेषसमूह
स्य वाक्यस्येत्यर्थः। वेदवाक्यस्य कृतिर्वाक्यरचना बुद्धिपूर्विका वाक्यरचनात्वात्। अस्मर्यमाणकर्तृकत्वं चानुकूलमेव यत एव स्फुटत
रं स्मर्यमाणत्वं नास्ति अत एव कर्तासाध्यते न च वक्तव्यं चितत्कचित् स्फुटतरास्मर्यमाणमात्रेण कर्तृत्वं साने भवलिन्यादिवाक्यानामंधकूपादीनां चा
कर्तृकत्वप्रसंगात्। न चास्मरणमपि नाहरासीन्नरात्रिरासीदित्यादिवेदवाक्यादेव। तस्मात्तपस्तेपानाच्चत्वारो वेदा अजायंत इति कर्तृस्मरणात्।
अर्थवादमात्रमिति चेत् न कर्तृस्मरणस्य सर्वत्राविध्यर्थत्वात्। तथा च कालिदासवाक्यस्याप्यकर्तृकत्वप्रसंग इति। ननु परिदृष्टकारकचक्रम

गु०कि० धितिष्ठत एवेश्वरस्य कर्तृत्वं तथा च स्थानकरणादीनामन्वयव्यतिरेकात् वर्णानिष्पत्तिं प्रति सामर्थ्यावगमात्तदधिष्ठानभूम्यतया न वेदकर्तृ
८६ त्वं भवेत्। न च शरीरमंतरेण तस्य स्थानकरणसंभवः। तेषां ताल्वादिविवृततादिरूपत्वादिति चेत्। न ज्ञानवद्बोधात् न हि वयमस्य भगवतः कार्य
86 विशेषेणानुविहितभावाभावतयोपकरणं शरीरं निराकुर्मः। अणुकादिनिष्पत्तये द्व्यणुकादिवत् शरीरान्वयव्यतिरेकानुविधायिकार्य
निष्पत्तये तदुपग्रहस्यापीष्यमाणत्वात्। गृह्णाति हीश्वरोंऽतरांतरा शरीरं दर्शयति च विभूतीरिति। अपि त्वायतनतया कर्तृत्वनिर्वाहक
तया व्यापकतया च तन्नस्य नेष्यते भोगाभावात् कर्तृत्वस्य च नित्यत्वात् कार्यस्य च कर्त्रा निरुपाधिसंबंधाच्छरीरव्यभिचाराच्चेति। लिंगांतरमाह
वेदे ददातिशब्दो बुद्धिपूर्वकोत्यागोक्तित्वात् लौकिकददातिशब्दवदिति [illegible]रीति। ददातिशब्दो योयं संप्रदानमभिसंधाय प्रयुज्यते ददाति कर्मणा
चयमभिप्रैति कर्त्ता स संप्रदानं वेदे च कर्त्तुरभावाद्ददातिशब्दो व्यर्थतामापद्यतेति भावः॥ ननु निर्दोषतया वेदस्य स्वत एव प्रामाण्यमुत्पद्यतेऽतस्तत्रा राम०
प्तस्वीकारेणेति चेत् न प्रामाण्यमुत्पद्यत इत्यस्यैव व्याहतत्वात् औपाधिकसामान्यविशेषो हि प्रामाण्यं परापरभावानुपपत्तेः यदि हि ज्ञानत्वे ८६

च परमपरं प्रामाण्यं तदा ज्ञानरूपेष्विंद्रियादिषु प्रामाण्यं न स्यात्। अथ प्रामाण्यं परं ज्ञानत्वमपरं तदानीं संशयविपर्ययादिष्वप्रमाणेषु ज्ञानत्वं
च न स्यात्। प्रमारूपउपाधिरूपस्य यतेन चासौ स्वतो ज्ञायते। तथा हि प्रमा ज्ञानहेतुव्यतिरिक्तहेत्वधीना कार्यत्वे सति तद्विशेषत्वात् अप्रमावत् यदि तु ता-
वन्मात्राधीना भवेत् अप्रमापि प्रमा भवेत् अस्ति हि तत्र ज्ञानहेतुः अन्यथा ज्ञानमपि सा न स्यात् ज्ञानत्वेप्यतिरिक्तदोषानुप्रवेशादप्रमेति चेत्
एवं तर्हि दोषाभावमधिकमासाद्य प्रमापि जायेत नियमेन तदपेक्षणात्। अस्तु दोषाभावोऽधिको भावस्तु नेष्यत इति चेन्न। भवेदप्येवं यदि दोषैर्निय-
मेन भावैरेव भवितव्यं न त्वेवं विशेषादर्शनादेरभावस्यापि दोषत्वात्। कथमन्यथा ततः संशयविपर्ययौ। ततस्तदभावो भाव एवेति स्वरूपं नेष्यते य-
था प्रामाण्यं प्रति दोषाभावस्य तथा चक्षुर्गुणस्यापि कारणत्वं अप्रामाण्यं प्रति यथा दोषस्य तथा चक्षुर्गुणाभावस्यापि हेतुत्वमिति सर्वं यथार्थं दुःपरि-
हरम् एवं प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत् यदि तु स्वतो ज्ञायेत न कदाचिदपि प्रामाण्ये संशयो न स्यात् ज्ञानत्वसंश-
यवत्। ननु स्वतोऽपि ज्ञायते संदेहसामग्रीसन्निपातात् सांशयिकमपि भविष्यतीति विपक्षे किं बाधकमिति चेत्। नैतदेवं न हि साधकबाधकप्रमाण

मात्वमवधूयसमानधर्मदर्शनादेवासौ तथास्त्विति तदनुच्छेदात्। प्रमाणवदप्रमाणेऽपि तत्प्रत्ययदर्शनादनुवृत्तिशंकेति चेत्। किं प्रमाणज्ञानोपलं-
भेऽपि तत्प्रामाण्यं नोपलब्धं प्रमाणज्ञानमेव वा नोपलब्धं। आद्ये कथं स्वतः प्रामाण्यग्रहः प्रसयप्रतीतावपि तदप्रतीतेः। द्वितीये तु कथं शंकाधर्मिण
एवानुपलंभादिति। स्यादेतत्। प्रचुरतरसमर्थप्रवृत्तेरपि न स्वतः प्रामाण्यमन्यथैवोपपत्तेः प्रवृत्तिकारणमिच्छा तत्कारणमिष्टाभ्युपायताज्ञानं
तत्कारणमपि तज्जातीयतालिंगानुभव इत्यादिस्तत्कारणप्राचुर्यादेवसंगतं ननु प्रामाण्यग्रहस्य क्वचिदप्युपयोगः। न चानवस्था प्रामाण्यस्या-
वश्यपवेद्यत्वानभ्युपगमात् तथात्वे वा उभयोरपि समत्वादिति॥ यद्यपि शाब्दानंतरमुपमानमंतर्भावयितुमुचितं तथापि शब्द एव चेष्टाप्रत्ययः स-
मयबलप्रवृत्तेः शब्द एव नतु शब्दव्यवहारो लौकिकः प्रायिकत्वात् चाक्षुषज्ञाने दर्शनव्यवहारवदिति केचित् तदभिसंधाय शब्दप्रस्ताव एव चेष्टोप-
न्यास इति भावः। अन्ये तु ध्ययेव चेष्टाप्रमाणमिसाहुः नत्र्य न धूमाग्निवदविनाभावोपलंभः नापि घटपटादिवन्नियतसंकेतोपलंभः किंतूर्द्ध्व
तर्जनीमात्रन्यासादिशसंख्यामात्रप्रतिपत्तिः क्वचिदेव केषांचिदेव भवतीति कथमिव नातिरिच्यते। तदेतदुभयमपि दूषयति प्रसिद्धाभिनयस्येति प्र

सिद्धोव्योप्ताग्रहीतोऽभिनयःसंस्थानविशेषःसंकेतविशेषोयेनपुरुषेणतस्यचेष्टयाकायिकव्यापारेणप्रतिपत्तिदर्शनात्प्रतिपत्तिदर्शनरूप
त्वात्तदपिप्रतिपत्तिदर्शनमुपलभ्यमानंज्ञानमनुमानमेवऽनुमानफलमेवेत्यर्थः।ऽथवातदपिचेष्टारूपमपिऽनुमानमेवऽनुमानकर
णमेवशब्दस्यसर्वांतरव्यापारत्वादितिशेषः।इदमत्राकूतंसतिहिचेष्टायाःप्रामाण्येतदीयशब्दप्रवेशश्चिंतनीयःप्रमाणमेवत्वसौनभवति।द्विवि
धाहिसाकृतसमयाकृतसमयभेदात्।तत्राकृतसमयातावत्चेष्टाऽभिप्रायस्यशब्दस्यस्मारणमात्रोपयोगिनीलिपिवत्।शब्दस्यवत्तुचेष्टोत्पादितस्मरणा
समारूढःप्रमाणमर्थे।नचस्यस्तुसादनाच्छब्दविषयमेवास्याःप्रामाण्यंप्रमाफलस्यतथात्वात्।नचस्मृतिरस्याऽवांतरव्यापारःयदिचेष्टोपधान
मंतरेणावगतोऽपिशब्दोनार्थंगमयेदेवमपिसंभवेत्नचैतदस्ति।नन्वेवंसतिचेष्टयेऽमूकव्यवहारानापत्तिःनस्यसौततःशब्दस्मृतिमानुगृहीत
समयत्वादितिचेत्ऽतएवतंप्रतिशब्दवदर्थेपिसमयवत्वेनचेष्टायाःकुंठत्वमेवव्यवहारस्त्वन्वयव्यतिरेकाभ्यांनियतविषयाविनाभावस्यग्रहणेनिव
सौपयिकाभिप्रायानुमानादेवेदंमूकस्यकीरतुरगयोःकशांकुशाभिघातादिवेतिऽकृतसमयापिचेष्टानप्रमाणांतरमविनाभावाभावात्नहियत्र

वर्त्तमानकालादिप्रतिपादकं वैदिकदेशविशेषं च प्रत्ययाः प्रकरणादयस्तु विधेयविशेषे शाब्दी नियमयन्ति न तु कारकं कालविशेषे तु प्र० ६

गु० कि० धूमस्तत्राग्निरिव नोपाधिकसंबंधवद्यत्नोद्बुद्धतज्ज्ञानीतत्र दशसंख्यापदार्थस्मरणमिति नियमः भयोपदर्शनादिषु व्यभिचारात् स्मारयन्तु वा

८८ पदार्थान्न तथापि न प्रमाणं। द्विविधा हि सा समयप्रकारभेदात् तत्कल्पनत्वयिनी तत्स्पन्दयिनी च। तत्र कल्पनत्वयिनी भयोजकाभिप्रायं स्मारयन्ती प

68 वर्त्तयति न तु किंचित्प्रमापयति घटीप्रहरशंखध्वनिवदतो न प्रमाणमेवं स्पन्दयिनी कारकेषु कर्त्तृकर्मादिरहिता केवलप्रातिपदिकार्थप्रधा

नायथोद्बुद्धतज्जन्या दशेति क्रियासु वर्त्तमाना न प्रधानायथाकुंचितहस्ताङ्कनादागच्छेति। तथा च गोरश्व इत्यादिषु वैरिवस्वतन्त्रेषु पदार्थेषु स्मा

रितेषु परस्परमन्वयाप्रत्ययः। पदैकदेशविभक्तिविशेषवच्चेष्टैकदेशविशेषात् प्रकरणविशेषाद्वाकारकादिस्मृतिनियम इति चेत् न चेष्टै

कदेशविशेषाभावात्। नह्यनीतानागतं वर्त्तयति। न था त्वेवा गोरश्च इत्यादावपि प्रकरणादिभिः कर्मह्लादीसु न्नीयविवक्षितार्थावसायः स्यात्। न

हि चेष्टाकलापे प्रकरणादयः कारकविशेषादीनाक्षेप्तुमलं। न उपरक्तं स्वकदेशमिति नियमः तथा त्वेवा कालसंख्याविशेषप्रतिपादकविभक्ति राम०

समभिव्याहारवैयर्थ्यप्रसंगात्। कथं तर्हि तया व्यवहारविशेषः संशयप्रतिनयोरन्यतरस्मात् विशेषाद्युपलंभेपि विरूपवर्त्तिनि समान ८८

धर्मिणि स्थाणावर्थे न इवेति। तस्मादुभयथापि चेष्टा न प्रमाणं। तदिदमुक्तं कृताभिनयस्येति। अकृताभिनयचेष्टायाः प्रामाण्यसंभावनैव ना
स्तीति कृताभिनयस्य तु चेष्टा स्वरूपतो यद्यपि न प्रमाणं तथापि संशयस्तान्न वृद्धिंगतयेत्यर्थः॥ उपमानमंतर्भावयति॥ आप्तेनेति। आप्तेन प्रसिद्ध
गोगवयसादृश्येनाप्रसिद्धगवयस्याज्ञातगवयस्य कीदृग्गवय इति जिज्ञासावतो गवाये सादृश्येन गवयशब्दवाच्यस्य प्रतिपादनात् यथा
गौस्तथा गवय इति आप्तवचनमेवातिदेशवाक्यमेवोपमानं प्रमाणमित्यर्थः। वाक्यादेव संज्ञासंज्ञिसंबंधपरिच्छेदस्यापि सिद्धेः। तथा हि न तावदस्य
विषयः सादृश्यं पदार्थांतरमेव संभावनीयं सादृश्यसामान्यानतिरेकात्। भूयोऽवयवसामान्ययोग एव हि सादृश्यं। न चैतत्सदृशोऽसाविति ज्ञानं ने
द्रियजं इंद्रियासंबंधात्तद्विशिष्टाननुभवेनास्मरणरूपत्वादुपमानं प्रमाणमिति वाच्यं। तथा सत्येतद्धि सदृशोऽसावित्यस्याप्युपमानतापत्ते॥ साद
श्यनियतं चैतत्। अथैतदर्थापत्तिरेवेति मनोरपस्ताहंकृतमस्मास्वपि विद्विषेणोक्ति। संज्ञासंज्ञिसंबंधपरिच्छेदः प्रसक्षाद्यसाध्यत्वादुपमानप्र
त्वमिति चेत्। न वाक्यादेवसमयपरिच्छेदोपपत्तेः। यः खलु गोसदृशस्तस्य गवयशब्दः संज्ञेति वाक्यादेवानेन समयस्य परिच्छिन्नत्वात्। केवलमिदानीं

गु०क्रि० प्रत्यभिजानात्ययमसाविति। भवेदेवं यदि सादृश्यं प्रवृत्तिनिमित्तं स्यात्तथा सत्यप्रतीतगूनामव्यवहारप्रसंगात्। न चोभयमपि निमित्तं स्वयंप्रती-
८९ तसमयसंक्रांतये ऽतिदेशवाक्यप्रयोगानुपपत्तेरिति। ननु गवयत्वे वृद्धव्यवहारादयं व्युत्पन्नो न सादृश्य इति कथमेतन्निर्धारणीयं। न नुमानान्नाम नि-
र्द्धार्यते तं तथाप्यापाततः संदिहानत्वादेतावतैव वाक्यमफलमिति चेन्न पूर्वनिमित्तानुपलंभे नैफल्यसिद्धिः इदानींतस्मिन्नुपलंभे तदेतद्वाक्यस्य नि-
समारूढं फलिष्यति ऽर्थ्यप्रयुक्तसमयपरिगृहीत इव वेदराशिरंगोपांगपर्यवदातस्य कालीनरे। न च वाक्यं वाक्येन स्वार्थस्य प्रागेव बाधितत्वात्पर्ये-
वसितमिति गोसदृशपदस्योपलक्षणनिमित्तयोरन्यतरत्र तात्पर्यसंदेहात्। इदानीं तु गवयत्वे ऽवगते तर्कपुरस्कारात् सादृश्यस्योपलक्षणतायां व्यवस्था-
पितायां गंगायां घोष इतिवत्तद्वाक्यादेवान्वयप्रतीत्युपपत्तेः। न स्वनिपुणंमन्याः प्रसवंति इदं तेनान्येवमपि वाक्यं पर्यवसन्नमेवेन्तथा हि गोसदृशो-
गवयपदवाच्य इति सामान्याधिकरण्यमात्रेणैवान्वयोपपत्तौ विशेषसंदेहे ऽपि वाक्यस्य पर्यवसितत्वेन मानांतरोपनीतानपेक्षणात्। भवति हि रक्ता- एम०
रक्तसंदेहे ऽपि पटो भवतीति वाक्यपर्यवसानं ऽन्यथा वाक्यभेददोषात्। यत्र तु गंगायां घोष इत्यादौ पदार्थानामेवान्वयायोग्यता तत्र प्रमाणांतरोपनीते ८९

नाप्यन्वयः। तस्माद् गोसदृशो गवयशब्दवाच्य इति वाक्यान्निर्णीतेपि सामान्यविशेषवाचकत्वे समानांतरमनुसरणीयं। न च तदनुमानादिकं संभवतीत्यु
पमानमेवं तदाचक्षत इति। ~~साधु विरचितमेतत् ननु पदवाचकत्वे समानांतरमनुसरणीयं। न च तदनुमानादिकं संभवतीत्युपमानमेव तदाचक्षत इ~~
ति। साधु विरचितमेतत् ननु मुख्येनैव बधीयतां। द्विविधं हि सामानाधिकरण्यं शाब्दमार्थं च तत्र नन्तावछह् सामानाधिकरण्यमात्रेणान्वयोपपत्तिः
मातावंध्येति प्रमतिष्वपि प्रसंगात्। नापि क्रियाकारकयोः परस्परमपेक्षामात्रेणात्यासत्तिः गंगायां जलमिति वद् गंगायां घोष इत्यत्रापि परस्परा
धाराधेयप्रतीतावन्वयप्रसंगात्। आर्थं तु सामानाधिकरण्यं यथा घोषपदार्थपर्यालोचनया मिहदुर्लभं तथा गोसदृशो गवय इत्यत्रापि दु
र्लभमेव गोसादृश्यं गवयशब्दप्रवृत्तिनिमित्तं न भवती सापुष्पतैव निकृष्टं कितं उपलक्षणतामात्रेणाचोदाहृते न गोसादृश्येन यदुपलक्षणीयं गव
यत्वं तेन सह गवयशब्दान्वयस्तदा गंगापदेनाप्युपलक्षणीयतीरेण सह घोषस्यान्वयोपपत्तौ कथमन्वयवैधुर्यं। तस्माद्वास्तवसामानाधिकरण्यविरह
दपर्यवसन्नं वाक्यमेवं विधप्रमां करोतीति तच्चानुमानशरीरमेव॥ अर्थापत्तिमतं भावयति दर्शनात्यापत्तिर्विरोधेनेति॥ दृश्यते उपलक्ष्यत इति दर्शनमु

गु० कि० च्यते अर्थ्यते गम्यते ॥ नेनेत्यर्थः हेयोपादेयत्वादिना विषयीक्रियत इत्यर्थः ॥ दर्शनं चासावर्थश्चेति दृष्टेनार्थः तस्यापत्तिरनुपपत्तिरित्यर्थस्तथा च दृष्टप्रमा
९० णो योऽर्थो यत्रानुपपद्यमानः सन्नर्थान्तरं कल्पयति सा दृष्टार्थापत्तिः यथा जीवन्देवदत्तो गृहे नास्तीति गृहाद्बहिः सत्त्वं दृष्टप्रमाणेनोपलब्धं जीवतः क्वापि
90 भवितव्यमिति सामान्यतः प्रवृत्तानुमानविरोधात् अन्यथाऽनुपपद्यमानमर्थान्तरं बहिः सत्त्वं कल्पयति। तदेतद्दूषयति विरोधेऽपीति। विरोधानुमानमेवे
त्यर्थः ॥ यद्यपि जीवनो गृहाभावस्य बहिः सद्भावो न विरोधी किं त्वनुकूल एवोपपादकत्वात् तथापि जीवनगृहासत्त्वयोः परस्परविरोधित्वादनुमानं
विरोधानुमानं। इदमत्राभिसंहितं न तावद् नियम्यनियामकयोः परस्परमुपपाद्योपपादकभावः अतिप्रसंगात्। अथानेन स हेतुश्छित्ति रत्नेन वि
नाऽनवस्थानमस्य स्वभावादेवमिति तत् एवं तर्हि व्याप्तिरेवेयमन्वयव्यतिरेकमुखनिरूप्येति कुतोऽर्थान्तरग्रहः। न च सत्यप्यविनाभावे तज्ज्ञानं वै
धुर्यात् प्रमाणान्तरत्वे अनुपपत्तिप्रतिसंधानस्याप्युपगन्तव्यत्वात् अन्यथाऽतिप्रसंगात्। अर्थापत्त्याभासानवकाशाच्च। यदा हि मिहतदानान्यत्र राम०
यदा चान्यत्र तदा नेहेति व्याप्तिग्रहणस्य प्रत्यक्षत एव सुकरत्वात्। न चाविनाभावनिश्चयेऽप्यपक्षधर्मत्वादर्थापत्तित्वं व्यधिकरणेनाविनाभावस्ये ९०

वनिश्चयायोगात्। न चात्र प्रमाणद्वयविरोधोऽपि तथा सति रज्जुसर्पवदेकस्मिन्प्याप्तत्वप्रसंगात् भिन्नविषयत्वाच्च। क्वाप्यस्तीति सामान्यतो गेहस्यापि प्र
देशादेकविषयतापस्तीति चेत्। यद्येवं क्वचिदस्ति क्वचिन्नास्तीति वन्न विरोधः। नन्वत्रापि विरोध एवार्थापत्त्योभयोरप्युपपादनाद्विषयव्यवस्थेति चेत् न वि
भिन्नदेशतयाऽनयोः सर्वत्र संभवद्व्यतिरेकेणैकविषयतया विरोध एव न संगच्छते। तच्च व्याप्तिशरीरमेव। प्रसिद्धोऽनुमानसाधारणं चैतत् न हि धूमो
वह्निना विनोपपद्यते धूमाद्वह्निना भवितव्यमनुपपत्तेश्च न भवितव्यमिति प्रमाणद्वयविरोधे चार्वाग्भागपरभागव्यवस्थापनस्य च फलत्वात्।
अनुमानाभावे विरोधस्यैवासिद्धेरिति चेत् न व्याप्तिग्राहकेण प्रमाणेन विरोधस्योक्तत्वात् तस्मात्सूक्ष्मं विरोध्यनुमानमिति। ननु तथापि श्रुता
र्थापत्तिः पृथगस्तु केवलव्यतिरेक्यादिवत् किंचिद्धर्म्यादिसाहश्रवणादिति। एकस्य शब्दस्य श्रवणादनुपपद्यमानतया शब्दान्तरकल्पना
या सा श्रुतार्थापत्तिः यथा पीनो देवदत्तो दिवा न भुंक्ते इति वाक्यश्रवणाद्रात्रौ भुंक्ते इति वाक्यकल्पना। शाब्दी ह्याकांक्षा शब्देनैव पूर्यते न हि भवति।
कें पचतीत्युक्ते कलायमिति शब्दप्रयोगमन्तरेण प्रत्यक्षोपदर्शिते पिकमेणि श्रोतुराकांक्षानिवृत्तिः। क्वचिद्धूमसंकेताद्गवपि चेष्टाविशेषाद्

गुणकिरणावली

गु०कि० भिप्रायस्य शब्दविशेषानुमानादेव तन्निवृत्तिः। ननु वाक्ये न स्वार्थसंसर्गे वबोधनात्किमनुपपन्नं वाक्यस्वरूपमेव गौरश्व इतिवत्परस्परमन्व
९१ याभावादिति दूषयति अनुमितानुमानमिति लिंगभूताद्वाक्यादनुमिते नपीनत्वेन तत्कारणीभूतं हि रात्रिभोजनमनुमीयते। अत्राप्येतदभिसं
हितं श्रुतार्थापत्तिस्तावत्स्वसिद्धान्तविरोधिनी। तथा हि सिद्धत्वाद्वदर्थः प्रमाणविषयो न तु तेनैव कर्तव्यः न च पीनो देवदत्तो दिवा न भुंक्ते इत्यत्र
१ रात्रौ भुंक्त इति वाक्यशेषोस्ति अनुपलंभबाधितत्वात्। उपसंभिव्यक्तिसामग्रीतात्वादिव्यापारादिविरहाद्योग्यस्य शंकितुमशक्यत्वात्। तस्मा
दभिप्रायस्यैव परिशिष्यमाणस्यान्तराभावात्। वेदरूपे च वाक्ये वक्तुरभावात्तस्य चेदभिप्रायो नास्ति नास्ति श्रुतार्थापत्तिरिति। न च लोके तद्व्युत्पादनं निः
प्रयोजनत्वात्। लोकवेदयोरनन्यत्वाच्च। तस्मात्स्वीकरणीयं वेदस्यापौरुषेयत्वं परिहर्तव्या वा श्रुतार्थापत्तिरिति उत्तरं व्यसनं। यस्तु नः शब्दीचा
कांक्षा शब्देनैव पूर्यत इति किमेतावता यस्य यथा नियमस्तस्य तथैव गमकत्वं अर्थवच्छब्देपि तस्याविशेषात्। तस्मात्सूक्ष्ममनुमितानुमानमिति राम०
॥ संभवमंतर्भावयति संभवोपीति। द्विविधो हि संभवो योग्यताकारो निश्चयाकारश्च। तत्र प्रथमोप्रमाणमेवानिश्चायकत्वात् यथा संभवति ब्राह्म ९१

मानमपि वह्निज्ञानं न प्रत्यक्षलाक्षिमात्रः तत्राप्यनुमीयमानवह्नौ इंद्रियव्यभिचारात् साक्षात्कारिजातीयत्वाभाव ज्ञानेतस्मात् अन्यत्र लोपप्रमान ॥ ६ ॥

रोऽनुपः संभवति कृत्रिये शौर्यमिति। द्वितीयस्तु यथा संभवति सहस्रे शतं संभवति पणः पुराणे ऽस्ति तदप्याह अविनाभावित्वादिति। सहस्रं हि
शतेनाविनाभूतं न हि कार्यं कारणेन विना भवतीत्यनुमानमेव॥ स्यादेतत् उपमानादौ प्रमाणांतरत्वप्रसक्तिसंभावनया यत्नः तदंतर्भावचिंतनं तु
उचितमेव यत्र तु प्रमाणांतरत्वस्यैव प्रसक्तिविरोधस्तद्भावादेरपि प्रमाणमेव रूपमभ्युपगंतव्यमत आह अभावोऽप्यनुमानमेव। अपिशब्दात् क्वचि
त्प्रत्यक्षमेवेत्यर्थः न त्वभावस्येंद्रियेण न सन्निकर्षो नापि सत्तामात्रेण व्याप्रियमाणस्यानुपलब्धिर्लिंगमत आह यथोत्पन्नमिति। यथो
त्पन्नं कार्यं कारणस्य सामग्र्याः सद्भावे लिंगं एवमनुत्पन्नं कार्यं स्वप्रागभावः कारणप्रागभावे सामग्र्यभावे लिंगं ज्ञापकं। स चाभावः क्वचित्प्रत्य
क्षः क्वचिच्चानुमानिक इति लोकप्रसिद्ध इत्यर्थः। नन्विह घटो नास्ति भूतले इति प्रतीतेः साक्षात्कारित्वमसिद्धं प्रागुक्तत्वादिषु इंद्रियव्यतिरेकेणैव
तथाभावप्रतीतेरिति चेत्। न वै ज्ञासात्। न च साक्षात्कृतसनुमितिसोऽरेकजातीयत्वं तथापि व्यभिचारेवा साक्षात्परिहरूपमानत्वात्। अभावज्ञान
नमानुमानिकमित्येतदेवासंगतं तथाविधलिंगाभावादिस्येतरपि नास्ति। भवति हि तद्भूतलं तदा चैत्राभाववत् एकज्ञानग्रहणायोग्यस्य ज्ञायमान

गु०कि० त्वेतत्र चैत्रवत्तयाऽज्ञायमानत्वादिति। न च प्रदेशांतरे घटवत्तयाज्ञायमाने न प्रदेशांतरे च तद्वत्तयाऽज्ञायमानेन भूतलेनेदमनैकांतिकमिति वाच्यं
९२ तत्रेति पदेन विशेषणात्। न चैवं ज्ञानाभावस्यात्मधर्मत्वेन भूतलधर्मत्वाभावात् व्यधिकरणत्वं भूतलज्ञानाभावयोर्विषयविषयिभावलक्षणसंबंध
स्य हेतोर्विद्यमानत्वात्। यस्तु नरस्तत्र प्रत्यर्पितं ज्ञानाभावो न तावद्भूतलमात्रेण निरूप्यते घटवत्त्वस्यापि तथाभावप्रसंगात् घटाभाववद्भूतलत्वेन निरूप्यत्व
पक्षे त्वन्योन्याश्रयः प्रवृत्ते ह्यनुमाने तत्राभावग्रहणं गृहीते च तस्मिन् तस्य लिंगतायामनुमानप्रवृत्तिः परस्य तु व्यधिकरणाप्यनुपलब्धिर्व्य
वहारयतीति। तदसत् वस्तुगत्या सा घटाभाववत्तैव भूतलमात्रेण ज्ञानाभावस्य निरूपणाभ्युपगमात्। न चातिप्रसंगः तत्र घटाभावात्। न चान्योन्या
श्रयः सत्तामात्रेणोपयोगात् यदि तु घटाभाववत्ता भूतलेनानुपलब्धिर्निरूप्यते तदा विपरीतस्येव घटसंबंधस्य प्रसंगः स्यात् तत्र च जातु नर
मेव स्यात्। न चैवमनुपलब्धिस्वीकारे प्यप्रतीकारादिति। स्यादेतत् इंद्रियान्वयव्यतिरेकानुविधाने सत्यपि तेन सहाभावस्यायोग्यत्वेन संबंधाभा एम०
वादधिकरणमात्रनिष्ठतया तत्संकोच्यते यथा पर्वतो वह्निमानयं धूमवत्त्वादित्यत्रेति चेत्। भवेदेवं यदि रूपादिष्वपि चक्षुरादेर्योग्यतामीक्षा ९२

महे। कार्यदर्शनात्तत्कल्पनमिदमपि समानं। न च योग्यतया अनिश्चयमात्रेण स्फुटतरसाक्षात्कारापह्नवः तथा सत्यन्योन्याश्रयात्। कुतो
वाऽनुमीयमानवह्न्यादावपि चक्षुर्न प्रवर्त्तते तस्य संबंधवर्त्तमानविषयत्वात्। वह्नेश्च व्यवधानवशेनासंबद्धत्वादिति चेत्। नन्वेतदेव कुतः।
व्यवधाने साक्षात्कारिप्रत्ययप्रसंगादिति चेत् तर्हि यत्र साक्षात्कारस्तत्राव्यवधानमिति कृतमस्मासु मिथ्याभिनिवेशेन। यदि चाधिकरण
ग्रहणे न तदुपक्षीणं स्यात् न चैवमस्यापि त्वगिंद्रियोपनीते घटादौ रूपविशेषाभावप्रतीतिः स्यात्। अस्ति हि तस्याधिकरणग्रहणमस्ति च प्र
तियोगिस्मरणमस्ति च रूपामेरकत्वाभावानुपलब्धिश्च अधिकरणग्राहकेंद्रियग्राह्याभाववादिनोपि समानमिति चेत्। न प्रतियोगिग्राहकें
द्रियग्राह्योऽभाव इत्यभ्युपगमात्। ममापि प्रतियोगिग्राहकेंद्रियेणाधिकरणग्रहेऽनुपलब्धिः प्रमाणमित्यभ्युपगम इति चेन्न वायौ त्वगिं
द्रियोपनीते तद्रूपाभावप्रतीत्यनुदयप्रसंगात्। तथापि तत्र तत्संनिकृष्टमिति चेत् हंत एवमन्यत्र चरितार्थमिंद्रियमवश्यमपेक्षणीयं च रू
पाभावानुभवे नेति सिद्धं नः समीहितं। यत्पुनरेकाकिभूतलस्वरूपातिरिक्तमभावाख्यं प्रमेयमेव नास्तीति तदसन् एकत्वसंख्यायाः घटेपि सत्तिन

गु० कि०
९३

ट्वस्य त्वात् अद्वितीयमात्रस्य व्यभिचारात् पटद्वितीये भूतले ऽघटव्यवहारात् । अद्वितीयतामात्रेण च घटाभाववद्भूप टाभावव्यवहारस्यापि प्रसक्तेर्वि
शेषात् । प्रतियोगिविशेषाद्विशेषेपि दृश्यमाने स्मर्यमाणे वा प्रतियोगिनि तथाभूत भूतलस्याभाव व्यवहारहेतुत्वमिति चेत् । कस्य पुनः प्रतियोगी
घटः न तावद्भूतलतद्विज्ञानयोः घटेन सहसंभवात् परस्परमवध्यत्वाच्च । नाप्यभाव व्यवहारस्य असंसभावेस घटे पि घटाभाव व्यवहारस्य प्रसं
जितत्वात् । यस्तु पुनः कीदृशेन भूतलेनाभावो निरूप्यत इत्यादि । तदसत् भाव व्यवहारस्यापि विलोप प्रसंगात् । तथा हि घट व्यवहारो न तावद्भूतल
मात्रेण निरूप्यते अघटवत्यपि प्रसंगात् । नापि सद्वितीयेन पटशाकटवत्यपि प्रसंगात् । अवच्छानुपपत्तेश्च । घटवत्तानुतन्निरूपणे घटसत्वात् मा
क्रतत्संबंधानुपपत्तेः सतिसंबंधे वा घटवतिघटस्वीकारे वैपर्य्य प्रसंगात् । तस्माद्भावव्यसनमपि त्यज्यतां स्वीक्रियतां वा ऽभावः प्रमेयमिति । स
चु प्रथमतो द्विधा संसर्गाभावस्तादात्म्याभावश्च । संसृज्यमान प्रतियोगिनिरूप्यो ऽभावः संसर्गाभावः । तदात्मत्वाभिमतप्रतियोगिनिरूप्यस्तु तादा
त्म्याभावः नच स्तंभे ऽधिकरणे पिशाचतादात्म्यं नास्तीत्ययमपि संसर्गाभाव एवेति वाच्यं । न च स्तंभपिशाचयोस्तादात्म्यं प्रमाणसिद्धं किंचिदस्तियत्तत्र

राम०
९३

प्रतिषेधनीयं किं तु सत्तमात्मतया प्रसंजितस्यापि श्राचस्यैवायं प्रतिषेध इति। संसर्गाभावोपि प्राक्प्रध्वंसात्यंताभावभेदेन त्रिधाभिधीयते। चरमसा
मग्रीसन्निपतितसमवायिकारणजातीये संभावितोत्पत्तिकस्य कार्यजातीयस्योत्पत्तेः प्राक् संसर्गाभावः॥ तथा जातीयकारणे उत्पन्नस्य पश्चात् प्रागभावः॥
संसर्गाभावः प्रध्वंसाभावः। संबन्धिमात्रे समवायिकारणवृत्तिः स संबन्धिमात्रस्यानियतकालः संसर्गाभावोऽत्यंताभावः। तदनेनेह भूतले घटो ना
स्तीति व्याख्यातं घटतत्संसर्गाभावयोरत्यंतनिषेधासंभवेपि संसर्गविशेषव्यतिरेकात्यंतमभावात्। न चाप्रसक्तप्रतिषेधः सामान्यतस्तस्यापि प्रसक्त
त्वादिति। स चायं नोत्पद्यते नापि विनश्यति। इतरेतराभावोप्येकपिंडाभावेपि सामान्यवदविनाशित्वान्नित्य इति॥ ऐतिह्यमंतर्भावयति तत्रैतिह्य
मपि। इतिह इति निपातसमुदायः पुरावृत्तेनतस्य भाव ऐतिह्यं। यथाहुरनिर्दिष्टवक्तृकं प्रवादपारंपर्यमैतिह्यं श्रुतिस्मृत्यादिवाक्यवत् प्र
सिद्धप्रकृष्टप्रवक्तृकं यन्न भवति लोके च प्रसिद्धमवाधितं कारं प्रवादपारंपर्यं यदभिसंधाय पठंति ऋष्याचाराच्च स्मृतिं ज्ञात्वा स्मृत्येषु श्रुतिक
ल्पनमिति। एवं चावितथमेवेत्याप्तोपदेश एव। तथा चानुमान एवांतर्भवतीति भावः॥ ननु सिद्धमनुमानं पंचावयवप्रयोगसहायतानुज्ञानसा न

गु०कि० ९४ नुपपन्नात्तद्व्यतिरेकेऽनुमीयते। योनेनेत्यर्थो लिंगं तत्स्वार्थे स्वस्य निश्चितस्य साध्याविनाभावितया स्वयं गृहीतस्य प्रतिपाद्यतेनेनेति प्रतिपादनं
प्रतिपादकं यत्परार्थे परसंदेहच्छेदार्थं तत्परार्थानुमानं। केन रूपेण पुनस्तत्प्रतिपादकत्वं तदाह पंचावयवेन तु वाक्येनेति। इत्थंभूतलक्षणे
तृतीया पंचावयवरूपं पदिस्यर्थः। अथवास्वनिश्चितस्यानुमेयस्य प्रतिपादनं प्रतिपत्तिर्येन लिंगप्रतिपादनानंतरव्यापारवता पंचावयवेन वाक्ये
९५ न स्मृतिसमारूढेन परस्य भवति तत्तथाभूतं वा कथं परार्थानुमानमिति। न चैवं सत्यस्यप्यनुमेयप्रतिपत्तेः शाब्दत्वप्रसंगः केवलशब्दस्यानिमित्तत्वा
त्। न च लिंगप्रतिपादनमात्रेणाविरम्य व्यापाराभावो विभिन्नविषयत्वादिति। ननु बौद्धादीनां द्व्यवयवेनापि वाक्येन व्यवहारोऽतस्तद्भेदार्थं
स्वोक्तमेव विवेचयति पंचावयवेनैवेति। इतरव्यवच्छेदोऽवधारणार्थः तच्चानुसादयिष्यते। प्रकृतमर्थमधिकृसस संदिग्धवृद्धिप्रयेत्वाच्चुसन्नयो
रपि जल्पवितंडाभ्यां गलितेऽहंकारे संदिग्धतामेव नीत्वा प्रतिपादनं। इयांस्तु विशेषः कस्यचित्स्वरसवाही संदेहः कस्यचिदाहार्यः तदनेन संदिग्धप्र राम०
तिपत्तये पंचावयववाक्यमंगमेवेति दर्शितं। न हि स्वयं सम्यक्तत्त्वशास्त्रस्य पुस्तकोपादानमेवांततोऽनुपपन्नमेवेति बालस्यापि तत्प्यासंभवतीति भा ९४
८ त्मापि स्वयमनुमानोद्यात ५ न स्वयम प्रतिपन्न एवाक्ये तथा मतिपर प्रतिपादनस्यानुपपन्नेरतत्राह पंचावयवेनेति। कर्त्कितेगम्यते ११८

वुःपदानि पुनः परस्परान्वितं स्वार्थं बोधयंतीति हंति वाक्यार्थलिंगमन्यथावेति । किमाद्रैकवणिजो वहिस्त्रिचिंतया । न हि स्वातंत्र्येण शब्दस्य प्रामाण्यमस्मा
भिरिष्यते किंतु वक्तृज्ञानापेक्षया । न चान्विताभिधाने प्रमाणमस्ति अन्वितार्थप्रतीतेरन्यथाप्युपपत्तेः यत्र युसन्निहितद्रुत्कृगसापदार्थेतरान्वित
मिति न प्रकृतोपयोगि । न हि यत्रच क्षुधः सामर्थ्यमवगतं तत दृत्कृगतास्पर्शेवदिति तद्धाप्य स्वविषयः आकांक्षानुपपत्तिरस्त । न हि सामान्यतो
नवगमे ऽन्वयविशेषे जिज्ञासा स्यादिति चेत् । न दृष्टेरस विशेषजिज्ञासावदाक्षेपतोप्युपपत्तेः शब्दमहिमानमंतरेण यतः कुतश्चिदपि स्व
न तेघुपदार्थेषु अन्वयप्रतीतिः स्यात् न चैवं ततः शक्तिरवश्यं कल्पनीयेति चेन्न आधुकाव्यानुपपत्तेः स हि संसर्गविशेषमप्रतीत्य वाक्यरचनानन्वस्वो
त्प्रेक्षायां चिंतावशेन पदार्थस्मरणव्यतिरिक्तमन्यत् प्रत्यक्षादि संभवति ततः कविभिः स्मृतानां संसर्गो नावगम्यते नाच यन्न नियमेन यदपेक्ष
तेतेन तत्रावश्यं शक्तिराधेया तथा सति कारकृता पक्वादिभिः कार्यज्ञेयादिषु शक्तिकल्पनागौरवस्य सर्वत्र दुर्वारत्वात् स्यादेतत् पंचावयववाक्यं तन
तदर्थे धियमाधत्त इत्यसंगतं निरवयवस्य हि स्फोटरूपस्य शब्दत्वात् यद्यपि च नाम प्रतिपादिताच्छब्दादर्थप्रतिपत्तिरर्थप्रतिपत्तौ च सत्यां तदन्यथानु

गु०कि० पपन्नास्फोटाभिधानस्यप्रतिपत्तिरित्यन्योन्याश्रयैस्ततयानार्थोपत्तिःप्रमाणं तथापि गौः पदमित्युभिन्नाकारावगाहिप्रत्यक्षमेवनानावर्णातिरि

९५ क्तमेकमवयव्यादिवदभिन्नार्थस्फोटंसाधयति न चेदनौपाधिकं तदभावात् न तावदेकधीविषयत्वमुपाधिः अनुभवानां क्रमशालितया तत्प्रभवस

95 स्काराणां क्रमवत्त्वात् तज्जनितस्मृतीनामपि क्रमवत्त्वात् अननुसंहितोपाधेरुपहितप्रत्ययायोगात् नाप्येकार्थप्रतीतिहेतुत्वमुपाधिः अन्योन्याश्रयप्र

संगात् प्रतीतेर्ह्येकपदत्वे एकार्थहेतुत्वेऽवगते च तस्मिन् एकपदत्वसिद्धिरिति अत एव नैकार्थसंबंधाख्यानमुपाधिः तस्मादुपाधेरसंवेदनाद्धनादि

प्रत्ययवदयं प्रत्ययो न भ्रान्त इति अत्रोच्यते औपाधिक एवायमभिन्नविषयः संभवतीति चेत् एकार्थप्रतीतिहेतुत्वमेवोपाधिः न चान्योन्याश्रयत्वं पूर्वे

मेकपदत्वावधारणानभ्युपगमात् एकार्थप्रतीतिहेतुत्वं च वर्णानां क्षणिकत्वेऽपि स्मर्यमाणानां नियतानुपूर्वीविशिष्टानां यावतां यादृशानां च त्या

दिपरिगृहीतानां सुकरमेव अन्यथा तु स्फोटस्फोटस्वीकारेऽपि समानत्वादिति कृतं विस्तरेण पूर्वपूर्वपदानुस्मरणानुगृहीतमंत्यपदं स्मर्यमाणं वाक्यं न रम०

पुनरनुभूयमानं क्रमवद्वर्णसमुदायस्य पदस्य श्रवणे इंद्रियजातानुभवगोचरत्वासंभवात् । यथा च पूर्वपूर्ववर्णानुस्मृतिनिचयसहितोंत्यवर्णानु ९५

भवसंसोपांत्यवर्णस्मरणसमनुभवयोर्द्विचतुरनिरंतरमुच्चार्यमाणवर्णपक्षे च विनश्यदविनश्यदवस्थयोरुपांत्यांत्यानुभवयोर्लब्धस्मरणसमनुभवरूपवैचि
त्र्यस्यैकस्य च ज्ञानस्य कारणत्वं न संभवति तत्संबंधे समानतेत्यादिद्विविधं चान्त्ये ह्रस्वतन्त्यते पदप्रक्रियानुप्रथमवर्णज्ञानस्योत्पादः संस्कारस्योत्पद्यमानते
त्येकः कालः ततः संस्कारस्योत्पादः द्वितीयवर्णज्ञानस्योत्पादः तेन च पूर्ववर्णानुभवसंस्कारसहितेन द्वितीयसंस्कारस्योत्पद्यमानता प्रथमवर्णज्ञा
नस्य विनश्यत्ता इत्येकः कालः ततः संस्कारांतरस्योत्पादः द्वितीयवर्णज्ञानस्य विनश्यत्ता प्रथमवर्णज्ञानस्य विनाशः अंत्यवर्णानुभवस्योत्पादः उत्पन्ने
न च संस्कारेणांत्यवर्णानुभवसहकारिणा पूर्ववर्णद्वयविषयस्मरणस्योत्पद्यमानतेत्येकः कालः ततः स्मरणस्योत्पादः अंत्यवर्णानुभवस्य विनश्यत्ता द्वितीय
वर्णज्ञानस्य विनाशः ततः समयस्मृतेरुत्पद्यमानतेत्येकः कालः ततः समयस्मृतेरुत्पादः स्मरणस्य विनश्यत्ता अंत्यवर्णानुभवस्य विनाशः पदार्थ
प्रतिपत्तेरुत्पद्यमानतेत्येकः कालः ततः पदार्थप्रतिपत्तेरुत्पत्तिः स्मरणस्य विनाशः संकेतस्मृतेर्विनश्यत्ता संस्कारस्योत्पद्यमानतेत्येकः कालः त
तः संस्कारस्योत्पादः पदार्थप्रतिपत्तेर्विनश्यत्ता संकेतस्मृतेर्विनाश इत्येकः कालः ततः पदार्थप्रतिपत्तेरपि संस्काराद्विनाश इति। अस्यांनुप्रक्रियायां संके

गु०कि०
९६
96

तस्मिन्समय एवांत्यवर्णानुभवस्य स्मरणेन विनाशितत्वात् पदार्थप्रतिपत्तौ पूर्वभावित्वमपि नास्तीति कारणत्वं न स्यादिति दोषे स्मरणानुभवयोर्विरो
ध एव परिहारायेति मंतव्यं। वाक्यप्रक्रिया तु अंत्यवर्णानुभवस्योत्पादः स्मरणस्य विनश्यत्ता ततः संस्कारपदप्रतिसंधानयोरुत्पद्यमानतेत्येकः कालः अथ
तयोरुत्पादः स एव पदप्रतिसंधानात्मा समयसंस्कारोद्बोधः संबंधस्मरणस्योत्पद्यमानता संस्कारादि चित्रप्रत्ययविनश्यत्तेत्येकः कालः अथ तस्योत्
त्पादः स एव पदप्रतिसंधानात्मा समयसंस्कारोद्बोधः संबंधस्मरणस्योत्पद्यमानता संस्कारादि चित्र समयस्मरणस्योत्पादः चित्रप्रत्ययस्य विनाशः पदप्र
तिसंधानस्य विनश्यत्तेत्येकः कालः॥ पंचावयववाक्यमित्युक्तं तत्र च विशेषनिश्चयार्थमाहत्यावयवा इति॥ पुनः शब्देनावधारणार्थेन जिज्ञासादयो
निरस्ताः। तेषामशब्दरूपत्वात्। तत्र न्यायपरिभाषत्वात् प्रथमं प्रतिज्ञामुदाहरति तत्रानुमेयोद्देशोऽविरोधी प्रतिज्ञेति। तत्र तेषु अवयवेषु मध्ये। नन्वेवं स
ति यत्कृतकं तदनित्यमित्यस्यापि प्रतिज्ञात्वं स्यात् अनुमेयोद्देशत्वात् अतः स्वोक्तमेव विवरणेन प्रतिपिपादयिषितेत्यादिना अस्तित्वादिधर्मापेक्षया सर्वे एव राम०
हि धर्मिणो धर्मविशिष्टा अतः प्रतिपादयितुमिष्टे न च धर्मेणाविशिष्टो यो धर्मी पक्षस्तस्योद्देशमात्रमभिधानमात्रं साधनरहितं प्रतिज्ञा। न च तद्दू ९६

न्यमुद्देश्यमात्रं किंचित्करमित्यत आह अपदेशाविषयापादनार्थमिति। अपदेशो हेतुः न न्वेवमप्यसाधनांगत्वात् नैतत्प्रयोगार्हमिति चेत्। कथं पुनरसा
साधनांगत्वं किं सर्वथैव कथास्वनुपयोगात् अथोपयुक्तस्यान्यथैव लघुत्वात्। आद्ये विप्रतिपत्तिमपि नोद्भावयेत् अनुद्भावयन् कथमिव प्रतिवदे
त् अप्रतिवदतश्च कथं वचनं कथात्वमियात्। तथा च कथमेकोऽपि निगृह्येत निग्रहस्थानाद्वा। द्वितीयः स हि द्विधा दाढ्यायावयवांतरं वा विवादाद
पि व्यवहिताद्वा अवयवांतरे कवाक्यतापन्नाद्वा। अवयवांतरादपि साक्षाद्वा आक्षेपतो वेति। न तावदाद्यः आसत्तेरभावादेकवाक्यतानुपपत्तेः। आसत्तौ वा
अंतरालिकासाधनांगवचने न निगृह्येत। अनिग्रहे वा पर्यनुयोज्योपेक्षणमासादयेत्। द्वितीये चाविवादे एवं च यमपि परम्युपेत पक्षविपरीतो
कोऽभिमुपनीयतत्सिद्धयेऽवयवांतरमभिदध्यादिति ब्रूमः न ह्येवंभूतविपरीतकोटिप्रदर्शकवाक्यव्यतिरेकेणान्यद्वाक्यं प्रतिज्ञास्वरूपमस्ति। नापि तृतीयः न
हि प्रतिज्ञार्थो हेत्वादिभिश्चतुर्भिरभिधीयत इति वक्ष्यामः॥ नापि चतुर्थः सह्यपेक्षाकालेऽन्यदा वा। न तावदाद्यः न ह्यनित्यः शब्द इत्युक्तमानायां नित्यः श
ब्द इत्युक्तावन्यत्किंचिदपेक्षितं कृतकत्वादिति वा यत्कृतकं तदनित्यमिति वा कृतकः शब्द इति वा सर्वस्यापि तत्तोसंबंधत्वेनाकांक्षिहेतुत्वाभावात्। प्रतिपन्नं क्रिया

द्विषयाहितदर्थे तन्निर्णयहेतुसाधनं वुभुत्साम्हे नतु साधनं प्रथमतः प्रतीत्य पश्चात् विवादविषयं तथा च तस्यैव प्रथममभिधाने प्राप्ते अन्यस्याभिधा
नानुपयोगात् आक्षेपस्यापि कुतोवकाशः अपेक्षितकथने च वचनव्यतिरेकेणापेक्षितसिद्धेरभावात्। भाप्यन्यदा न हि यत्कृतकं तदनित्यं यथा घटा
कृतकश्च शब्द इति वचनमवधानकारणं परस्पराश्रयप्रसंगात् अवधाने सत्यर्थनिश्चयः तस्माच्चावधानमिति वाक्यसामग्री नियमानादरे
त उदाहरणक्रमोपि नाद्रियेत प्रतिपाद्यापेक्षानियमानुरोधश्च समान इति अनित्यः शब्द इति तु अपेक्षिताभिधानवचने कृते कुत इत्यपेक्षा
यां कृतकत्वादिहेतोः समुचितसमुन्छानामिति रमणीयं॥ प्रतिज्ञाया उदाहरणमाह द्रव्यं वायुरिति। वायुर्द्रव्यमित्यर्थः। यो हि वायुस्वरूपं जान
न्नपि तस्य द्रव्यत्वे संदिग्धस्तं प्रति सिसाधयिषितेन द्रव्यत्वेन विशिष्टस्य वायोरभिधानं प्रतिज्ञेति कथायां नियमः। शास्त्रे तु प्रतिपत्तिमात्रमीप्सित
मिति विभावनाय द्रव्यं वायुरिति व्यस्य याभिधानं। अविरोधिपदस्य तात्पर्यमाह अविरोधिग्रहणादिति। प्रत्यक्षेणानुमानेन वाभ्युपेतं प्रतिपन्नं तद्वि
रोध्यनुमेयाभास इत्यर्थः। एवंविधस्यापि भ्रमादिना कदाचिदनुमातुमिष्टत्वात्। ननु वैशेषिकस्य प्रत्यक्षानुमाने प्रमाणद्वयमात्रमभ्युपगच्छतः

स्वशास्त्रादिविरोधस्य कुतः प्रसक्तिः न हि शास्त्रं नाम पृथक् प्रमाणमस्तीत्यत आह अभ्युपगतेति। न केवलमुभयसिद्धेनानुमानेनापि तु लोके शास्त्र
या प्रसिद्धेनास्माभिश्चानुमानतयाभ्युपगतेनेति नेयं। अभ्युपगममात्रस्य शब्दे नैव लब्धत्वात्। अपि च न केवलं प्रत्यक्षानुमानाभ्यामपि तु परशा
स्त्रमपि यत्त्वयमभ्युपगतमागमतयाभ्युपगतमागमात्वं तेनापि यद्विरुद्धं तदपि प्रतिज्ञाभास इत्यर्थः। प्रत्यक्षविरुद्धमुदाहरति यथानुष्णोऽग्नि
रिति। प्रत्यक्षविरोधी यथाग्निरनुष्ण इति योजना। प्रसक्तं प्रतिषिध्यते न च तेजोव्यतिरिक्ते न्यस्मिन् क्वचिदुष्णत्वमवगतं अनुमानादेवावगमेः
परंपरापातप्रसंगात्। प्रत्यक्षेणाचमतीतो तद्विषयमनुमानं तेनैव बाध्यत इति। नन्वयुक्तमेतत् बाधाविनाभावयोः सहासंभवात् बाधे त्वपक्ष
धर्मत्वमनैकान्तिकत्वं च स्यादिति चेत्। अत एवेदं पृथक् हेतुदूषणमिति वदामः। न हि सर्वोपसंहाररूपव्याप्त्यापरिगृहीतस्य वन्हेर्विपक्षत्वं सप
क्षत्वं वा असति बाधके वेधसापि सुवचं। बाधे तु तत्र लेतउत्तरकालीनमनैकान्तिकत्वं संभवत्यपि किं तेन उपजीवकेन उपजीव्यस्य बाधस्य क्रि
यते अन्यथानुविरुद्धस्यापि परिहारप्रसंगात्। तत्र हि साध्यस्य निश्चितत्वे हेतुरसिद्धो हेतुनिश्चये वा साध्यं बाधितमिति कुतो विरुद्धत्वावकाशः

उपजीव्योपजीवकभावे न तद्व्यवस्थाप्रसक्तेरपि समानेति। अनुमानविरुद्धमुदाहरति घनमंबरमित्यनुमानविरोधी। आकाशं हि स्वकाद्यं हि
स्वकार्यभूतेन शब्देन समवायिकारणतयाऽनुमीयते शब्दश्च विभुगुणत्वेन सार्वत्रिकोऽप्यसमवायिकारणप्रादेशिकत्वान्नियम्यते यदि पुनर
समवायिवत्समवायिकारणमप्यस्य निविडावयवितया नियतदेशं स्यात् न तर्हि गंधादिवत्सर्वत्रोपलभ्येत। ततो धर्मिग्राहकप्रमाणादेव घनमं
बरमिति प्रतिज्ञा बाध्यते। अभ्युपगतविरुद्धमुदाहरति ब्राह्मणेनेति। क्षीरयानोदाहरणेन हि द्रवद्रव्यत्वात्सुरापानस्य पावनत्वं दर्शयता तत्सा
वनत्वं तावद्रूपमभ्युपगंतव्यं न च तत्रानुमानं प्रभवति श्रुतिस्मृत्यागमसमधिगम्यत्वात्। तथा च दृष्टांतसाधकेनैव स्वयमभ्युपगतेन सुरापानस्यप
वित्रत्वं बाधितं भवति। स्वशास्त्रविरुद्धमुदाहरति वैशेषिकस्येति। ननु किमियं परिभाषा यत्स्वशास्त्रेणोक्तं तत्रैव श्रद्धेयमित्यत आह वैशेषिक
स्येति। विशेषो व्यवच्छेद्यः तत्त्वनिर्णयः तेन व्यवहरतीत्यर्थः। न च सत्कार्यवादे प्रमाणं निश्चायकमस्तीत्यभिप्रायः। विवादाध्यासितो भावः कारणव्या
पारात्प्रागपि सन् कार्यत्वात् यत्पुनः कारणव्यापारात्प्राक् असन्न भवति न तत्कार्यं यथा प्रधानमिति चेत्। न व्याघातात् यद्यपि प्रतिज्ञा प्रसाधारणाक्रि

यामात्रविषयत्वरूपे कार्यत्वहेतौ नासिद्धिः नाप्यसतो गगनकुसुमादेः सतोपि प्रधानादेः कार्यत्वस्याव्यावृत्तत्वात् साधारण्यं कारणव्यापारात् प्रागपीति विशेषणा
त् नापि संदिग्धव्यतिरेकित्वं पटो जायते जनिक्रियां प्रति कर्त्ता भवतीत्यादिकारकोपदर्शकप्रयोगस्य बाधकस्य विपक्षेपि संभवात्। नहि कारकमसद्वि
तुमर्हति न चेदं श्रौतमुख्ये बाधकाभावात् न च सत्कार्ये दूषणं बाधकं अन्योन्याश्रयप्रसंगात् तथापि कारकव्यापारात् प्राक् सन्निति प्रतिज्ञापदयोर्व्याघा
तः नहि सति कारकव्यापारसाफल्यमाकल्पयामः अन्यसत्यपि तुल्यमेतदितिचेत् न सतोऽसतो जन्यत्वात्। स्वकारणसमवायरूपाया उत्पत्तेर्निसत्वेपि तत्क्रियाविष
येभावरूपे वस्तुनि कारकव्यापारसाफल्यात् न सत्कार्यवादपक्षे त्वभिव्यंग्यवदभिव्यंजकेरपि सत्वात् अतिप्रसक्तिः सत्वेपि समाना। कारणविशेषनियमान्निय
मः सोपि तुल्यः। कारणसंबंधस्त्वसति संभाव्यते न तु सतीति विशेषः। न च कर्त्तव्यरूपवस्तुसाधनत्वे क्रियानिमित्तविरहात् कारणत्वप्रसंगः इति विषयस्यैव क्रि
यात्वव्यपदेशात् धात्वर्थमात्रस्य चातिव्यापकत्वात् अन्यथा सत्कार्यवादस्वीकारेप्यप्रतीकारात्। एतेनोपादानग्रहणात् सर्वसंभवाभावात् शक्तस्य शक्यकरणा
त् कारणभावाच्च सत्कार्यमित्यपि हेतुचतुष्टयमिति निरस्ताम्॥ ॥श्रीमदुदयनाचार्यविरचिता गुणकिरणावली समाप्ता॥०॥ ॥[illegible]॥ राम०
॥७॥ ॥श्री॥ ॥७॥ ॥श्री॥ ॥७॥ ॥श्री॥ ॥७॥ ॥ ९९

न्यायगन किरणावली

३०००

बस्ता ३

